।। श्रीः ।।

सिद्धान्तलक्षणम्

प्रो रामानुजताताचार्याः

डा चक्रवर्तिराघवन्

।। अविघ्नमस्तु ।।
।। अस्मद् गुरुभ्यो नमः ।।
।। श्रीश्रीनिवासपरब्रह्मणे नमः।।

श्रीवेंकटाद्रिनिलयं करुणापयोधिं
सर्वानुभाव्यनिजशक्तिमुदाररूपम् ।
कल्पद्रुमं स्वचरणं समुपाश्रितानां-
श्रीश्रीनिवासमहमन्वहमानतोस्मि।। (१)

श्रीमन्नृसिंहगुरुपादसरोजयुग्मं
चित्ते दधामि सततं परमं पवित्रम् ।
यत्संश्रयादिह समस्तजनोपि नूनं
विज्ञानसम्पदमनल्पतमामपैति ।। (२)

वन्देऽभिनववेदान्तदेशिकं तं महागुरुम्।
प्रज्ञानुष्ठानवैराग्यशेवधिं विबुधोत्तमम् ।। (३)

अत्यन्तमन्दधिषणाप्रसरः क्वचाहं
सर्वज्ञकल्पकरणीयनिबन्धनं क्व ।
आलम्ब्य केवलमहं सुदृढं गुरूणां
प्राज्यं प्रसादमिह कर्मणि सप्रवर्ते ।। (४)

आचार्यसूक्तिमनुचिन्त्य यथात्मशक्ति
विद्यार्थिनां सुखतरावगमैकदृष्टिः।
सर्वावगाहनकृते च गदाधरीय-
सिद्धान्तलक्षणकृतेः विवृतिं तनोमि।। (५)

प्रतियोग्यसमानाधिकरणेत्यादिलक्षणे प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति यथाश्रुतमूललभ्यं प्रतियोगितावच्छेदकावच्छिन्नान्यत्वं यत्पदार्थे विहाय नञ्व्यत्यासमवलम्ब्य दीधितिकृतां व्याख्याने बीजमाह - प्रतियोगितावच्छेदकावच्छिन्नमित्यादिना । यथाश्रुतमूलादिति।

नन्वत्र यत्पदार्थे प्रतियोगितावच्छेदकावच्छिन्नान्यत्वं कथं यथाश्रुतमूललभ्यम् ? नञ्पदसमभिव्याहारस्थले प्रथमोच्छारितपदार्थ एव नञर्थभेदानुयोगित्वबोधस्य घटः - पटो नेत्यादौ दर्शनात् । तथा च प्रकृते प्रथमोच्चारितप्रतियोगितावच्छेदकावच्छिन्न एव यत्पदार्थभेदः

यथाश्रुतमूलात् प्रतीयते - इति।

न च यत्पदस्य प्रतियोगितावच्छेदकावच्छिन्नेत्यतः प्राक् योजनया समीहितार्थसिद्धिरिति वाच्यम्।

तथा सति तादृशार्थस्य यथाश्रुतमूलप्रतिपाद्यत्वोक्तिविरोधापत्तेः। श्रूयमाणानुपूर्वीकत्वस्यैव यथाश्रुतत्वरूपत्वात् इति चेन्न - श्रूयमाणानुपूर्वीकत्वं न यथाश्रुतत्वं, किन्तु शक्तिनिरूढलक्षणान्यताधीनबोधतात्पर्यकत्वम् शक्तिभ्रमलक्षणाज्ञानाधीनबोधतात्पर्यकत्वं, निरूढलक्षणेकतरलक्षणाघधीनार्थप्रतिपत्त्यतात्पर्यकत्वं वा । एतादृशयथाश्रुतत्वं च यत्पदस्य पूर्वं योदजनायामपि अव्याहतमेवेति नोक्तदोषः। अग्रे वक्ष्यमाणनञ्व्यत्यासपक्षे च नेदं यथाश्रुतत्वम्।

तथा हि नञ्व्यत्यासो नाम न उत्तरत्रोच्चारितनञ्ः पूर्त्र योजना। प्रतियोगितावतच्छेदकावच्छिन्नमित्यत्र नञः समासाघटकत्वेन समासघटकीभूतप्रतियोगितावच्छेदकपदोत्तरं योजनायाः असम्भवात्। विवक्षितस्य प्रतियोगितानवच्छेदकावच्छिन्नमित्यर्थस्य यथाश्रुतमूलतः अनिर्वाहात्। अपि तु समस्तपदघटकीभूतप्रतियोगितावच्छेदकपदस्य प्रतियोगितानवच्छेदकरूपार्थे लक्षणातात्पर्यकत्वमेव नञो वक्तव्यम्। तथा च तादृश लक्षणायाः स्वारसिकत्वेन शक्तिनिरूढलक्षणाभिन्नत्वेन तादृशलक्षणाधीनार्थोपस्थापकप्रतियोगितावच्छेदकपदस्य यथाश्रुतत्वासम्भवात्।

ननु किमेतावता प्रयासेन, नञः पूर्वं योजनां विनैव स्वरसतः मूलात् प्रतीयमानस्य प्रतियोगितावच्छेदकावच्छिन्ने यत्पदार्थभेदस्यनिवेशे को दोषः इति चेत् - तथासति धूमवान् वन्हेः इत्यादौ वन्हिरूपरेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वावच्छिन्ने यत्पदार्थधूमभेदस्य अक्षदत्वेन अतिव्याप्त्यापत्त्या प्रतियोगितावच्छेदकावच्छिन्नं यद्यदिति वीप्साया अङ्गीकरणयतया तस्याश्च व्यापकतात्पर्यकतया गौरवापत्तेः।

न च यत्पदार्थे भेदनिवेशपक्षेऽपि प्रतियोगितावच्छेदकावच्छिन्नयत्किञ्चिदुदासीनपदार्थघटादिभेदमादाय धूमवान् वन्हे रित्यत्र

अतिव्याप्त्यापत्या भवन्मतेऽपि वीप्साया आवशयकत्वेन साम्यमिति वाच्यम्।

प्रतियोगितावच्छेदकावच्छिन्नं न भवति यत् इत्यनेन हेतुसामानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नं न इत्याकारकप्रतीतिसाक्षिकस्य प्रतियोगितावच्छेदक्तवावच्छिन्नावजच्छेदकताकप्रतियोगिताकस्य एक सामान्यभेदस्य साध्ये निवेशेन व्यापकत्वस्य अनिवेशेन लाघवात्।

यद्रूपावच्छिन्नस्येति - यद्रूपावच्छिन्नं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकाः येये धर्माः प्रत्येकं तत्तद्धर्मावच्छिन्नभेदवत् इत्युक्तौ वन्हिमान् धूमादित्यत्र तादृशो धर्मः महानसीयवन्हित्वं चेत् तदवच्छिन्न महानसीयवन्हिभिन्नत्वं वन्हित्वावच्छिन्नपर्वतीयवन्हौ , एवमन्यत्रापि विभिन्नं वन्हिव्यक्तिं यत्पदेन आदाय समन्वय इति। प्रत्येकमित्यनुक्तौ अनुगतेकप्रतियोगितावच्छेदकावच्छिन्नभेदस्य पूर्वोक्तौ अनुगतैकप्रतियोगितावच्छेदकावच्छन्नभेदस्य पूर्वोक्तयुक्त्ाय साध्येऽप्यसम्भवेन अव्याप्तिप्रसङ्गात्। प्रत्येकमित्युक्तौ प्रतियोगितावच्छेदकीभतैकैकधर्मावच्छिन्नैकैकभेदकूटत्वं साध्ये निवेश्यमिति लाभेन अदोषात्।

(नन्वेवं) तावद्भेदकूटस्य एकस्मिन्नपि साध्ये दुरुपपादकतया तद्दोषतादवस्थ्यमिति पर्यवसितार्थमाह - साध्यतावच्छेदकस्येति। भेदकूटेन प्रत्येकं सामानाधिकरण्ये इति। अनुगतभेदमनिवेश्य एकैकभेदनिवेशपरं मूलं इत्युक्तौ अर्थात् यद्रूपे भेदकूटसामानाधिकरण्यं पर्यवसितं भवति। तथाहि यद्रूपावच्छिन्नं तत्तद्भेदकूटवत् इत्युक्तौ क्वापि वन्हौ स्वात्मकव्यक्तिघटिततावद्भेदासम्भवेन एकानुगतभेदपक्षोक्तदोषानिस्तारेण यद्रूपस्य भेदकूटसामानाधिकरण्यनिवेशं विना दोषावारणात्। भेदकूटेनेति - तृतीयार्थः निरूपितत्वं । तस्य सामानाधिकरण्ये अन्वयः।

नन्वेवमपि भेदकूटाधिकरणसाध्याप्रसिद्ध्या कथं साध्यतावच्छेदके तत्सामानाधिकरण्यमिति चेत् प्रत्येकमित्युक्तम्। तथा च यावन्तो भेदाः तत्तद्भेदसामानाधिकरण्यकूटवत्वं साध्यतावच्छेदके निवेश्यमित्यदोषात्।

विभिन्नवन्ह्यादीति - हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यनेन यदा महानसीयवन्हित्वमुपदीयते तदा तदवच्छिन्नमहानसीयवन्हिभेदः साध्यतावच्छेदकाश्रयपर्वतीयवन्हाविति तदन्तर्भावेण वन्हित्वे तादृशभेदसामानाधिकरण्यम्। एवं यदा पर्वतीयवन्हित्वं प्रतियोगितावच्छेदकं विवक्ष्यते तदा साध्यतावच्छेदके महानसीयवन्ह्यन्तर्भावेण पर्वतीयवन्हिभेदसामानाधिकरण्यं इत्येवं रीत्या तादृशभेदकूटसामानाधिकरण्यं वन्हित्वे अक्षतमित्यर्थः।

एकव्यक्तिसत्तादिति - सत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादौ विद्यमानः योऽभावः गुणकर्मान्यत्वविशिष्टसत्ताभावः तत्प्रतियोगितावच्छेदकं तादृशविशिष्टसत्तात्वं तदवच्छिन्नविशिष्टसत्ताभेदः शुद्धसत्तायां नास्ति, विशिष्टस्य शुद्धानतिरिक्ततया शुद्धसत्तायां विशिष्टसत्ताभेदासम्भवेन सत्तात्वे तादृशभेदसामानाधिकरण्यविरहात्।

यत्किञ्चिदुदासीनपदार्थभेदसत्वेऽपि विवक्षितभेदकूटसामानाधिकरण्याभावात् अव्याप्तिरित्यर्थः।

उक्ताव्याप्तिं वारयितुं शंकते यद्रूपावच्छिन्नमिति - सत्तावान् जातेरित्यत्र प्रतियोगितावच्छेदकं विशिष्टसत्तात्वं तदवच्छिन्नाविषयिणी या प्रतीतिः इयं सत्ता इत्याकारिका सत्तात्वेन सत्ताविषयकप्रतीतिः तद्विषयत्वं सत्तायां अस्तीति लक्षणसङ्गतिः।

यद्रूपं प्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमिति वक्तव्यम्। अन्यथा उक्तस्थल एव विशिष्टसत्तात्वावच्छिन्नाविषयकप्रमेयं इत्याकारकप्रतीतौ सत्तारूपप्रमेयस्यापि विषयत्वात्। उक्तविवक्षायां च तादृश प्रतीतिविषयतावच्छेदकं प्रमेयत्वमेव न तु सत्तात्वमित्यदोषात्।

एवं प्रतियोगितावच्छेदकाश्रयाविषयकप्रतीतीत्युक्तौ सत्ताविषयकप्रतीतौ विशिष्टसत्तात्वाश्रयविषयकत्वं अक्षतम्। विशिष्टस्य शुद्धानतिरैकात्। अतः

प्रतियोगितावच्छेदकविशिष्टाविषयकत्वनिवेशः। तथा सति शुद्धसत्तात्वेन सत्ताविषयकप्रतीतेः वैशिष्ट्यसहितसत्तात्वावच्छन्नाविषयकत्वसत्त्वात्।

एतादृशपरिष्कारापेक्षया दीधितिकारीयविवक्षायां लाघवमस्तीत्याह- तत्र च यद्रूपं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकभिन्नमित्येव निवेशात्। उक्त परिष्कारे च यद्रूपावच्छिन्नेतादृशप्रतियोगितावच्छेदकावच्छिन्नभिन्नत्वस्य तदविषयकप्रतीतिविषयस्य वा निवेशनीयतया अवच्छिन्नपदार्थद्वयनिवेशेन गौरवादिति भावः।

अत्र यद्रूपं प्रतियोगितावच्छेकभिन्नमित्युक्तौ अवच्छेदकतायाः अव्यासज्यवृत्तित्वपक्षे वन्हिमान् धूमादित्यादौ धूमसमानाधिकरणमहनसीयवन्ह्यभावप्रतियोगितावच्छेदकतायाः वन्हित्वेऽपि पर्याप्ततया अव्याप्तिः स्यादिति प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयो वेति पक्षान्तरावलम्बनम्। तथा सति प्रतियोगितावच्छेदकमहानसीयत्वविशिष्टवन्हित्वाविषयकशुद्धवन्हित्वविषयकप्रतीतिविषयत्वसत्त्वेन अव्याप्त्यभावात्।

ननु प्रतियोगितावच्छेदकत्वस्य अव्यासज्यवृत्तित्वपक्षे वन्हित्वस्यापि प्रतियोगितावच्छदत्वपर्याप्त्यधिकरणतया तदविषयकप्रतीतिविषयत्वं कथं तत्र ।

न च ये ये प्रितयोगितावच्छेदकाः तत्तद्विषयकत्वकूटाभावकत्वं प्रतीतौ निवेश्यम्। वन्हित्वविषयकप्रतीतौ महानसीयत्वविषयकत्वासत्वेन तद्घटितकूटाभावस्य अक्षतत्वेन अव्याप्तेरभावात् इति वाच्यम्।

तथा सति धूमवान् वन्हेरित्यत्र प्रतियोगितावच्छेदकोदासीनपदार्थतावच्छेदकघटत्वादिविषयताघटितकूटाभावस्य धूमत्वमात्रविषयकप्रतीतौ सत्त्वेन अतिव्याप्तेः।

तथा च प्रतियोगितावच्छेतकाः ये ये धर्माः तत्तद्विषयकत्वाभावकूटस्यैव साध्यतावच्छेदके निवेशनीयतया तत्तदन्तर्गतमहानसीयवन्ह्यभावप्रतियोगितावच्छेदकवन्हित्विषयक्तवाभावस्य

वन्हित्वविषयकप्रतीतौ अबावेन अव्याप्ते इति चेत् -

मैवम् - प्रतियोगतावच्छेदकाविषयकेत्यनेन प्रतियोगितावच्छेदकत्वाव्यापकत्वमेव प्रतीतौ विवक्षितम्। अव्यापकत्वं च अवच्छेदकत्वसमानाधिकरणभेदप्रतियौगितानिरूपितविषयतासम्बन्धावच्छिन्नावच्छेदकत्वम्।

एवं च वन्हिमान् धूमादित्यादौ महानसीयवन्ह्यभावप्रतियोगितावच्छेदकत्वस्य महानसीयत्वेऽपि सत्त्वेन तत्र वन्हित्वविषयकप्रतीतेः विषयतासम्बन्धेन असत्त्वेन तत्र विषयतासम्बन्धेन तादृशप्रतीतिमद्भेदसत्त्वात् लक्षणसमन्वयः।

मिश्रास्तु - प्रतियोगितावच्छेदकावच्छन्नं यन्न भवति इति मूलस्य यत्पदस्य तद्धर्मावच्छिनं प्रतियोगित्वं इत्यर्थं प्रतियोगितावच्छेदकावच्छनं न भवतीत्यस्य च ???? स्वीकृत्य उक्तदोषं पारयन्ति तन्मतमाह - एवमिति-

यद्रूपावच्छिन्नमिति - यद्रूपरर्याप्तावच्छेदकताकप्रतियोगित्वं इत्यर्थः। उक्ताभावेति - हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकान्यमित्यर्थः।

वन्हिमान् धूमादित्यादौ वन्हिर्नास्तीतिप्रतीतिसिद्धाभावीयशुद्धवन्हित्पर्याप्तावच्छेतकताकप्रतियोगितायां हेतुसमानाधिकरणमहानसीयवन्ह्यभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं यत् महानसीत्वविशिष्टवन्हित्वं त्त्पर्याप्तावच्छेदकताकान्यत्वस्य अव्याहतत्वात् नाव्याप्तिरिति भावः।

सुलभमेवेति- यथाश्रुतार्थे यत्पदार्थवन्ह्यादिरूपसाध्ये

हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयवन्हित्वविशिष्टत्वस्यैव सत्त्वेन तदन्यत्वस्य दौर्लभ्यं सूच्यते। उक्तविवक्षायां च वन्हित्वावच्छिन्नप्रतियोगिताया महानसीयवन्हित्वावच्छिन्नप्रतियोगित्वापेक्षया विलक्षणायाः प्रतियोगितावच्छेदकमहानसीयत्विशिष्टवन्हित्वानवच्छेद्यत्वं सुलभमिति।

ननु लाघवात् यद्रूपावच्छिन्नं प्रतियोगित्वं हेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नं इति

रीत्यैव निवेशोऽस्तु किं तादृशप्रतियोगितावच्छेदकावच्छिन्नभिन्नत्ववनिवेशेन इत्याशंकायां तस्य प्रयोजनमाह - यद्रूपावच्छिन्नमिति।

तादृशप्रतियोगितेति। हेतुसमानाधिकरणाभावीयेत्येर्थः।

समवायादिनेति- कपालादौ समवायेन घटादौ साध्ये संयोगेन घटादिहेताविति। समवयेन घटाभाववति भूतलादौ संयोसेन घटस्य सत्त्वात् व्यभिचारित्वम्। अत्र च यद्रूपावच्छिन्नं प्रतियोगित्वं हेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नमित्युक्तौ हेतुतावच्छेदकसाध्यतावच्छेदकयोरेकत्वेऽपि घटत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगितायां घटरूपहेत्वधिकरणे भूतले विद्यमानः यः समवायेन घटाभावः तदीयप्रतियोगितायाः समवायसम्वन्धावच्छिन्नत्वेन तद्भेदस्य अक्षततया अतिव्याप्तिरित्यर्थः।

दूषणान्तरमप्याह- इदमित्यादिना। इदं-वाच्यं- ज्ञेयत्वादित्यत्रयद्रूपपदेन वाच्यत्वत्वस्यैव धर्तव्यतया वाच्यत्वस्य केवलान्वयित्वेन स्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वावच्छिन्न- प्रतियोगित्वाप्रसिद्ध्या

सम्बन्धन्तरावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगताया एव उपादेयतया तत्र च ज्ञेयत्वरूपरेतुसमानाधकरणः यः घटादौ विद्यमानः समवायेन वाच्यत्वरूपसाध्याभावः तदीयप्रतियोगिताभेदस्य असत्वेन अव्याप्तिः स्यात्। तद्वारणाय हेतुसमानाधिकरणाभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्यम्। तथा सति इदं-वाच्यं- ज्ञेयत्वादित्यत्र हेत्वधिकरणघटादौ समवायेन वाच्यत्वाभावसत्वेऽपि साध्यतावच्छेदकस्वरूपसम्बन्धेन वाच्यत्वाभावासत्त्वेन घटत्वाभावादेरेव स्वरूपसम्बन्धेन अभावः घटादौ वर्तत इति तत्प्रतियोगिताभेदः समवायसम्बन्धावच्छिन्नवाच्यत्त्वावच्छिन्नप्रतियोगितायामस्तीति लक्षणसमन्वयः।

एवं च व्यभिचारिमात्र एव धूमवान् वन्हेरित्यादावपि अतिव्याप्तिः स्यात्। सम्बन्धान्तरेति- साध्यतावच्छेदकभिन्नसम्बन्धेत्यर्थः। तथा च समवायसम्वन्धावच्छिन्न धूमत्वावच्छिन्नप्रतियोगितायां हेतुसमानाधिकरण धूमाभावीयसाध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नप्रतियोगिताभेदसत्त्वात् प्रतियोगितावच्छेदकधर्मभेदेनैव प्रतियोगितावच्छेदकसम्बन्धभेदेनापि प्रतियोगिताभेदात् साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगितायामविवक्षणे समवायसम्बन्धावच्छिन्नधूमत्वावच्छिन्न प्रतियोगिताया अपि वन्ह्यधिकरणायोगोलगकवृत्त्यभावीयतया सामान्यतः हेतुसमानाधिकरणाभावीयप्रतियोगिताभेदो नास्तीति व्यभियारिमात्रे अतिव्याप्तिविरहात् उपष्टम्भसङ्गतिः। एवं च अतिव्याप्तिवारणाय प्रतियोगितावच्चेदकावच्छिन्नभेदनिवेशः।

प्रतियोगिताभेदमिति - हेतिसमानाधिकरणाभावीयप्रतियोगिताभेदमित्यर्थः। प्रतियोगितावच्छेदकेति - हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकावच्छिन्नेत्यर्थः।

एवं विवक्षायां धूमवान् वन्हेरित्यादौ समवायसम्बन्धावच्छिन्नधूमत्वावच्छिन्नप्रतियोगितायां वन्हिसमानाधिकरणः यः संयोगेन धूमाभावः तत्प्रतियोगितावच्छेदकं यत् धूमत्वं तदवच्छिन्नत्वमेवास्ति। समवायसम्बन्धावच्छिन्नधूमाभावप्रतियोगितायामपि धूमत्वस्यैव

अवच्छेदकत्वादिति न दोषः।

भेदानुयोगीति - यद्धर्मावच्छिन्नप्रतियोगितायामित्यर्थः। तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नप्रतियोगित्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नमिति निवेशनीयम्।

पूर्वोक्तस्थले समवायेन घटवान् संयोगेन घटान् इत्यत्र यद्धर्मावच्छिन्नेत्यनेन समवायरूपसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया एव उपादेयतया तस्यां च हेतुसमानाधिकरणः यः समवायेन घटाभावः तत्प्रतियोगितारूपत्वमेव न तु तदन्यत्वमिति नोक्तरीत्या अतिव्याप्तिरिति भावः।

केवलान्वयीति - इदं-वाच्यं-ज्ञेयत्वादित्यत्र साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिः

स्यात् । अतः उक्तरीत्या यद्धर्मावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं दुर्निवेशमिति। यद्धर्मावच्छिन्नप्रतियोगित्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकानवच्छिन्नम् इत्येवं रीत्यैव निवेश्यमिति भावः।

गौरवमिति - यद्धर्मे हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपदीधितिकारीयपरिष्कारापेक्षया यद्धर्मावच्छिन्नप्रतियोगित्वे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नान्यत्वनिवेशे अवच्छिन्नत्वादीनां अधिकपदार्थानां निवेशेन गौरवस्य स्फुटत्वात्। एवं यत्पदस्य साध्यतावच्छेदकावच्छिन्नसाध्यबोधन एव स्वारसिकतया तादृशप्रतियोगिताबोधकत्वं क्लिष्टमेवेत्यपि बोध्यम्।

नञ् व्यत्यास इति - प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन सममित्यत्र अवच्छिन्नपदोत्तरं श्रूयमाणस्य नञः प्रतियोगितावच्छेदकेत्यत्र अवच्छेदकपदात् पूर्वं योजनया प्रतियोगितानवच्छेदकावच्छिन्नं तेन तस्य सामानाधिकरण्यं व्याप्तिरित्यर्थलाभः। मिश्राणामपि यथाश्रुतमूलात् यत्पदार्थभेदस्यैव प्रतीयमानतया नञ्व्यत्यासस्य आवश्यकता। परन्तु तन्मते गौरवमधिकम्।

ननु उक्तनञ्व्यत्यासः कथं सम्भवदुक्तिकः समासाघटकनञ्पदस्य प्रतियोगितावच्छेदकेत्यत्र मध्ये कथं निवेशः। न च तादृशनञर्थस्य

अन्वयः। समासाघटकपदार्थे अन्वयासम्भवादिति चेत् - प्रतियोगितावच्छेदकपदस्य अनवच्छेदकरूपार्थे लक्षणा। तात्पर्यग्राहकं नञ्पदमित्याशयः।

साध्यतावच्छेदके प्रतियोगितानवच्छेदकत्वनिवेशपक्षे अपि गौरवमस्तीत्याशङ् कते - न चेति - वाच्यमिति परेणान्वयः।

प्रतियोगितावच्छेदकभेदेति - हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकभेदनिवेश इत्यर्थः।

शुद्धवह्नित्वादाविति - महानसीयत्वादिरूपविशेषणान्तरविशेषितवह्नित्वादावित्यर्थः। विशिष्टवह्नित्वादिभेदस्य असत्वादिति। विशिष्टस्य शुद्धानतिरिक्तत्वादिति भावः।

प्रतियोगितावच्छेदकाविषयकेति - प्रतियोगितावच्छेदकपर्याप्तविषयत्वानिरूपकप्रतीतिनिरूपितविषयताश्रयत्वमित्यर्थः।

तेन वह्नित्वादिविषयकप्रतीतेरपि प्रतियोगितावच्छेदकीभूतमहानसीयत्वविशिष्टवह्नित्वविषयकत्वस्य विशिष्टस्य शुद्धविशेष्यानतिरिक्तत्वेन अक्षतत्वे अपि न क्षतिः। तथात्वे अपि तादृशप्रतीतेः महानसीयत्वविशिष्टपर्याप्तविषयत्वानिरूपकत्वात्।

ननु विशेष्यपर्याप्तविषयताकत्वे कथं विशिष्टपर्याप्तविषयताकत्वं न भवेत् विशिष्टशुद्धयोरैक्यादिति चेत् - विशिष्टविषयकप्रतीतेः शुद्धविशेष्यमात्रविषयकप्रतीतितो

विलक्षणतया तदीयविषयतायाः विशेषणविशेष्योभयान्तर्भावेन पर्याप्ततया

शुद्धविशेष्यमात्रविषयकप्रतीतौ तादृशविशिष्टपर्याप्तविषयताकत्वाभावेन अदोषात्।

तदपेक्षयेति - साध्यतावच्छेदके प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वविवक्षापेक्षयेत्यर्थः।

न गौरवमिति - साध्यतावच्छेदके प्रतियोगितानवच्छेदकत्वनिवेशपक्षे तदपेक्षया साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकानवच्छेदकत्वनिवेशपक्षे अवच्छिन्नप्रतियोगित्वस्य प्रतियोगितानवच्छेदकत्वस्थाने प्रतियोगितावच्छदकानवच्छद्यत्वस्य च निवेशेन गौरवमासीत्। इदानीं तु प्रतियोगितानवच्छेदकमित्यत्र प्रतियोगितावच्छेदकविषयताशून्यप्रतीतिविषयस्यैव निवेशनीयतया उभयपक्षे अपि गौरवसाम्यमिति भावः।

प्रत्येकमिति - घटः घटपटोभयं न इत्याकारकप्रतीत्या घटपटोभयत्वावच्छिन्नभेदः यथा घटे स्वीक्रियते तद्वत् शुद्धवह्नित्वे अपि महानसीयवह्न्यभावप्रतियोगितावच्छेदकतायाः महानसीयत्वसहितवह्नित्वपर्याप्ततया तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नभेदः अक्षत एव। व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य एकदेशे अव्याहतत्वात्।

अवच्छेदकाविषयकेति - प्रतियोगितावच्छेदकाविषयकेत्यर्थः। तथा च प्रतियोगितानवच्छेदकेत्यनेन प्रतियोगितावच्छेदकत्वावच्छिन्नभेदवत्त्वस्यैव विवक्षणात्। तावतैव पूर्वोक्तदोषवारणसम्भवात्। तत्र च मिश्रमतापेक्षया लाघवमक्षतमेवेति भावः।

ननु महानसीयवह्न्यभावप्रतियोगितावच्छेदकत्वं यदि घटपटोभयत्ववत् महानसीयत्ववह्नित्वोभयान्तर्भावेण

पर्याप्तं एकं स्यात् तदा तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नभेदः तदेकदेशकेवलवह्नित्वे स्यात्। तदेव न । वह्नित्वनिष्ठावच्छेदकत्वस्य महानसीयत्वनिष्ठावच्छेदकत्वस्य च भेदात्। कथमिति चेत् - वह्नित्वस्य प्रतियोगिनि वह्नौ समवायेन विशेषणतया तन्निष्ठं अवच्छेदकत्वं समवायसम्बन्धावच्छिन्नं, स्वरूपत एव विशेषणतया (अवच्छेदकतया) निरवच्छिन्नं च। महानसीयत्वनिष्ठम् अवच्छेदकत्वं तु महानसीयत्वस्य महानसानुयोगिकसंयोगप्रतियोगित्वरूपस्य स्वरूपसम्बन्धेनैव प्रतियोगिनि विशेष्णतया स्वरूपसम्बन्धावच्छिन्नमेव। एवं तस्य महानसीयतत्वेनैव अवच्छेदकतया किञ्चिदवच्छिन्नमपीति।

एवं च उभयपर्याप्तैकावच्छेदत्वस्य विरहेण प्रत्येकं अवच्छेदकत्वपर्याप्तिसत्वात् प्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य साध्यतावच्छेदकवह्नित्वे दुर्घटतया कथमस्मिन् पक्षे सामञ्जस्यमित्याशङ् कायां आह अवच्छेदकत्वस्येत्यादिना। भिन्नत्वे अपीत्यनेन शङ् कासूचनम्। सम्बन्धादीत्यादिपदेन सावच्छिन्नत्वनिरवच्छिन्नत्वयोः परिग्रहः।

तत्तदिति - महानसीयवह्निः नास्तीति प्रतीतसिद्धाभावप्रतियोगितावच्छेदकत्वत्वरूपेणेत्यर्थः।

अयमाशयः - अवच्छेदकत्वस्य वह्नित्वमहानसीयत्वगतस्य भिन्नत्वे अपि तस्य

तत्तद्व्यक्तित्वेन एकैकमात्रवृत्तित्वं महानसीयवह्न्यभावप्रतियोगितावच्छदकतात्वरूपानुगतरूपेण उभयपर्याप्तत्वं च इष्यते। एकव्यक्तौ एकरूपेण व्यासज्यवृत्तित्वानुपगमात्।

ननु तादृशप्रतियोगितावच्छेदकत्वव्यक्त्योः महानसीयत्ववह्नित्वगतयोः भेदे सति कथं अनुगतरूपेणापि उभयवृत्तित्वं, न हि घटस्य प्रमेयत्वेनापि सर्ववृत्तित्वं इति चेत् - सत्यम् - महानसीयत्ववह्नित्वोभयं महानसीयवह्न्यभावप्रतियोगितावच्छेदकं इति प्रतीतिः भवति। अत्र च उभयत्वावच्छिन्ने अवच्छेदकत्वपर्याप्तिः भासते। वह्नित्वं महानसीयवह्न्यभावप्रतियोगितावच्छेदकत्ववत् इति काचित् प्रतीतिः भवति। तत्र च अवच्छेदकत्वस्य स्वरूपसम्बन्धो भासते इत्युपेयम्। अन्यथा उभयोः प्रतीत्योः वैलक्षण्यानिर्वाहात्। घटः

द्वित्ववानिति प्रतीतितः घटो द्वाविति प्रतीतेरिव। तथा च उभयविधप्रत्ययानुरोधेन अवच्छेदकत्वस्य पर्याप्तितदतिरिक्तसम्बन्धविषयकत्वावश्यंभावे सति एकस्मिन्नेव धर्मे रूपभेदेन अनेकपर्याप्तत्व एकैकमात्रवृत्तित्वकल्पनमेव न्याय्यम्। लाघवात् बाधकाभावाच्च।

तर्हि घटस्यापि प्रमेयत्वेन सर्ववृत्तित्वं स्यात्। घटानधिकरणे पटवति देशे प्रमेयवानिति प्रतीतेः इति चेत् - महानसीयवह्न्यभावप्रतियोगितावच्छेदकतयोः भेदे अपि प्रतियोगितावच्छेदकतात्वेन उभयवृत्तित्वम् उभयत्र यथायथं अवच्छेदकत्वसत्त्वादेवाक्षतम्। तत्तद्व्यक्तित्वेन एकैकवृत्तित्वमेव। न हि वह्निनिष्ठावच्छेदकत्वव्यक्तिमहानसीयत्वे अस्ति। एवं च सामान्यरूपेण अवच्छेदकतायाः उभयपर्याप्तत्वमित्यस्य सामान्यरूपस्य उभयवृत्तितावच्छेदकत्वं उभयत्र यथासम्भवं अवच्छेदकत्वसत्तामादाय सम्भवति इत्येवाशयः।

चक्रवर्तिलक्षणे इति - हेतुसमानाधिकरणस्य व्याप्यवृत्तेः साध्याभावस्य प्रतियोगितायाम् अनवच्छेदकं यत् साध्यतावच्छेदकं इत्यादिलक्षणे - अवच्छेदकत्वं चेह तत्पर्याप्त्यधिकरणत्वम्। तेन विशिष्टवह्न्यभावस्य प्रतियोगितावच्छेदकत्वेऽपि वह्न्यभावप्रतियोगितावच्छेदकत्वपर्याप्तिवरहेणैव अव्याप्तिदोषवारणात् तादृश प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वं दीधितिकृतां अभिमतं इत्यवगमात् इति भावः।

विशेषरूपेण अव्यासज्यवृत्तेरपि सामान्यरूपेण व्यासज्यवृत्तितायां साक्षाद्ग्रन्थं सार्वभौमाणां आदर्शयति - सार्वभौमैस्त्विति। विशेषधर्मावच्छिन्नेति। तत्तद्घटत्वाद्यवच्छिन्नप्रतियोगिताकूटेत्यर्थः। सामान्यधर्मेति- घटत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगितासम्बन्धस्येत्यर्थः। विशेषरूपेणेत्यादि। तत्तद्घटत्वावच्छिन्नप्रतियोगितात्वेन। अव्यासज्यवृत्तेरपि - तत्तद्घटमात्रवृत्तेरपि। सामान्येति - घटत्वावच्छिन्नप्रतियोगितात्वेन यावद्घटवृत्तित्वमितीत्यर्थः।

सार्वभौमा हि विशेषाभावकूटापेक्षया अतिरिक्तसामान्याभावं नाभ्युपगच्छन्ति। तर्हि विशेषाभावस्य विशेषधर्मावच्छिन्नप्रतियोगिताकत्वस्यैव सत्त्वेन घटो नास्तीत्यत्र

तत्तद्घटाभवकूटस्य विषयत्वे तेषां तत्तद्घटत्वावच्छिन्नप्रतियोगिताकत्वेन

शुद्धघटत्वमात्रावच्छिन्नप्रतियोगिताकत्वाभावात् कथं घटो नास्तीत्याकारकता। यदि च सामान्याभावः अतिरिक्तः अभविष्यत् तदा सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं अभविष्यत्। तथा च प्रकृते कथमिति चेत् - विशेषधर्मावच्छिन्नप्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नत्वमपि कदाचिदिष्यते। यद्बलात् घटो नास्तीत्याकारकता

उपपद्येत प्रतियोगित्वान्तरकल्पनापेक्षया क्लृप्तप्रतियोगितास्वेव धर्मविशेषकल्पने लाघवात्। तथा च घटत्वावच्छिन्नप्रतियोगितात्वेन व्यासज्यवृत्तित्वम्। तत्तद्व्यक्तित्वेन च अव्यासज्यवृत्तित्वम् इति स्वशब्देनैव वदन्ति। तद्वदेव प्रकृतेऽपि तत्तदवच्छेदकत्वत्वेन अव्यासज्यवृत्तेरपि महानसीयवह्न्यभावप्रतियोगितावच्छेदकतात्वेन व्यासज्यवृत्तित्वस्वीकारे बाधकाभावात् लाघवाच्चेत्यभिप्रायः।

अत्र दोषं शङ्कते एवं सतीति - अवच्छेदकतायाः व्यासज्यवृत्तित्वस्वीकारेण प्रत्येकं अनवच्छेदकत्वोपपादने सति।

महानसीयेति - महानसान्तर्भावेण व्यभिचारित्वं बोध्यम्। अत्र साध्यतावच्छेदकं महानसीयवह्निभिन्नत्ववह्नित्वोभयम्। तच्च प्रत्येकं धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमेव। तथाहि धूमाधिकरणे महानसे वर्तमानः यो अभावः महानसीयवह्निभिन्नवह्न्यभावः तत्प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं महानसीयवह्निभिन्नत्ववह्नित्वोभयम्। तादृशपर्याप्त्यनधिकरणत्वं च केवल वह्नित्वे केवलमहानसीयवह्निभिन्नत्वे च अक्षतमिति साध्यतावच्छेदकोभयस्य प्रत्येकानतिरिक्तत्वेन प्रत्येकं उक्तरीत्या अनवच्छेदकत्वसत्त्वात् अतिव्याप्तिरित्याशङ् का।

ननु अत्र महानसीयवह्निमान् धूमात् इत्यत्रैव कुतो दोषो नोक्तः। उक्तरीत्या वह्नित्वरूपसाध्यतावच्छेदकस्य प्रतियोगितानवच्छेदकत्वसत्त्वात्।

न च यावत्साध्यतावच्छेदके प्रतियोगितानवच्छेदकत्वं निवेश्यते। महानसीयत्वे च

धूमाधिकरणपर्वतवृत्तिः यो अभावः महानसीयत्वविशिष्टाभावः तत्प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वस्य महानसीयत्वरूपसाध्यतावच्छेदके सत्त्वेन तादृशप्रतियोसितानवच्छेदकत्वविरहेण अतिव्याप्त्यभावादिति वाच्यम्।

तथा सति प्रमेयत्वसाध्यकस्थले साध्यतावच्छेदकीभूतयावत्प्रमेये तादृशानवच्छेदकत्वासम्भवेन उक्तविवक्षाया असम्भवादिति चेत् -

मैवम् - महानसीयवह्निसाध्यकातिव्याप्तिवारणाय वक्ष्यमाणविविक्षापेक्षया

हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणाविषयकप्रतीतिविषयत्वरूपरारिभाषिकभेद एव साध्यतावच्छेदके लाघवात् निवेशयितुमुचितः। तत्र च यावत्साध्यतावच्छेदके निरुक्तप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणापर्याप्तविषयताकत्वरूपस्य

पारिभाषिकप्रतियोगितावच्छेदकभेदस्य निवेशे वह्नित्वे तादृशभेदसत्त्वे अपि महानसीयत्वे तदसत्वेन अतिव्याप्तिवारणात्।

प्रमेयसाध्यतावच्छेदककस्थले घटत्वादिरूपप्रमेयस्य तादृशावच्छेदकत्वपर्याप्त्यधिकरणत्वेन तदविषयकप्रतीतिविषयत्वस्य घटत्वादौ दुरुपपादत्वे अपि प्रतियोगितवच्छेदकीभूतघटत्वाद्यपर्याप्ता या विषयता प्रमेयमिदम् इत्याकारकज्ञानीयप्रमेयत्वविशिष्टप्रमेयपर्याप्ता विषयता तदश्रयत्वस्य प्रमेयत्वविशिष्टे कूपपादत्वेन अदोषाच्च इत्यतो महानसीयवह्निभिन्नसाध्यकानुधावनम्।

इदानीं तु वह्नित्वे महानसीयवह्निभिन्नत्वे च प्रत्येकं प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणापर्याप्तविषयताकत्वं सम्भवति। कथमिति चेत् - हेत्वधिकरणे महानसे महानसीयवह्निभिन्नद्रव्यत्वादिसत्त्वेन सामान्यतः महानसीयवह्निभिन्नाभवस्य असत्त्वेन महानसीयवह्निभिन्नप्रतियोगितावच्छेदकतापर्याप्त्यसत्त्वेन महानसीयवह्निभिन्नत्वविशिष्टवह्नित्व एव तत्सत्त्वेन प्रत्येकं तादृशावच्छेदकतापर्याप्त्यधिकरणाविषयताकप्रतीतिविषयत्वस्य उभयत्र सत्त्वेन अतिव्याप्त्यपरिहारात् इत्याशयेन महानसीयवह्निसाध्यकोपेक्षा।

प्रकृतेति - प्रकृतानुमितिविधेयतावच्छेदकता यादृशरूपावच्छिन्ने पर्याप्ता तादृशरूपावच्छिन्नानुयोगिताकः यो हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदः तद्वत् साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः।

एवं च प्रकृते महानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकम् अनवच्छेदकत्वेऽपि प्रकृतानुमितिविधेयतावच्छेदकतायाः उभयत्वावच्छिन्नपर्याप्ततया तदवच्छिन्ने हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्तिमति विरोधेन तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नभेदासत्त्वेन नातिव्याप्तिरिति भावः।

उक्तस्थलीयेति - महानसीयवह्निभिन्नवह्निमानिति स्थलीयेत्यर्थः। दर्शितधर्मद्वयेति - महानसीयवह्निभिन्नत्ववह्नित्वरूपधर्मद्वयेत्यर्थः। विरोधेति - प्रतियोगिना साकं अभावस्य विरोधादित्यर्थः।

नन्वेवं विवक्षणे वह्निमान् धूमादित्यादौ उक्तस्थले च साध्यतावच्छेदकवृत्त्यसाधारणधर्मस्य वह्नित्वत्वस्य उक्तोभयत्वस्य च अनुपस्थितिदशायां निरुक्तव्याप्तिज्ञानस्य असम्भवात् तदानीं धूमादिहेतुकवन्ह्याद्यनुमितिः न स्यात् इत्याशङ् कां इष्टापत्या परिहरति - साध्यतावच्छेदकेति। तदवच्छिन्न इति। महानसीयवह्निभिन्नत्ववह्नित्ववह्नित्वोभयत्वावच्छिन्न इत्यर्थः। आदिना वह्नित्वत्वपरिग्रहः।

व्यापकताज्ञानेति - साध्यवदन्यावृत्तित्वादिरूपव्याप्तिज्ञानस्य अनुमितिकारणतावादिनां मते साथ्यतावच्छेदकवह्नित्वत्वाद्यनुपस्थितिदशायामपि स्वरूपतो वह्नित्वघटितवह्निमदन्यावृत्तित्वादिरूपव्याप्तिधियः सम्भवात् तन्मते नोक्तापत्तिरिति भावः।

नन्वेवं सर्वत्र साध्यतावच्छेदकवृत्तिधर्मोपस्थित्यावश्यकतया स्वरूपतो

वह्नित्वादिसाध्यतावच्छेदककानुमितिः न स्यात्। कदाचित् वह्निमान् कदाचित् वह्नित्ववद्वान् इत्यनुमित्योः कारणीभूतव्याप्तिज्ञानवैलक्षण्येनैव उपपादनीयतया तत्र च यादृशव्याप्तिज्ञाने स्वरूपतो

वह्नित्वे अनवच्छेदकत्वग्रहः तदानीं स्वरूपतः वह्नित्वविधेयतावच्छेदकताकानुमितिः यत्र च वह्नित्वत्वावच्छिन्ने अनवच्छेदकत्वग्रहः तदा तद्रूपावच्छिन्नविधेयतावच्छेदकाताकानुमितिरिति स्वीकरणीयम्। एतच्च न सम्भवति। उक्तपरिष्काररीत्या सर्वत्रैवसाध्यतावच्छेदकतावच्छेदकावच्छिन्न एव अनवच्छेदकत्वस्य व्याप्तौ निवेशेन उक्तनियामकस्य दुर्वचत्वादित्याशङ् कायां व्यापकताज्ञानकारणतावादिमते अयं दोषः अस्त्येवेति दीधितिकृतैव वक्ष्यत इत्याह - तेन तेनेति - वह्नित्वत्वपूर्वोक्तोभयत्वत्वादिनेत्यर्थः । अनवच्छेदकत्वग्रहादिति। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहादित्यर्थः। तत्तद्रूपेति - वह्नित्वत्वपूर्वोक्तोभयत्वत्वावच्छिन्नेत्यर्थः। अनुमित्यनुपपत्तिरिति - इदं च व्याप्तिज्ञाने साध्यतावच्छेदकस्य यादृशी विषयिता अनुमितावपि तस्य तादृशी विषयितेति मताभिप्रायेण।

यत्पदस्य यद्रूपविशिष्टपरत्वेन व्याख्यानस्य प्रयोजनमाह - यत्त्वेति - तत्तद्रूपावच्छिन्नलिङ्गकानुमित्यौपयिकव्याप्तिशरीरे इत्यादिः। यत्पदेन महानसीयधूमोपादाने तत्त्वस्य तन्मात्रवृत्तितयाहेतुव्यक्तिभेदेन व्याप्तिः भिद्येत।

ननु व्याप्तिभेदोऽस्तु पक्षीयधूमव्याप्तिज्ञानात् पक्षे साध्यानुमित्युपपत्त्या बाधकाभावादिति चेत् तत्राह - सा चेति। विभिन्नव्याप्तिश्चेत्यर्थः।

नानुमितीति - न प्रकृतानुमितिनिर्वाहकेत्यर्थः। कुतः इत्याकाङ्क्षायामाह - पक्षीयेति। पूर्वमिति। महानसीयधूमादौ व्याप्तिग्रहकाल इत्यर्थः। अगृहीतत्वादिति - भूयोदर्शनबलेन महानसादौ महानसीयधूमादिव्यापकमहानसीयवन्ह्यादिसामानाधिकरण्यादिरूपव्याप्तेः गृहीतत्वेऽपि पर्वतीयधूमव्यापकतायाः वन्हौ तत्काले ग्रहणं न सम्भवति। असन्निकृष्टत्वात्। न च सामान्यलक्षणाप्रत्यासत्त्या भवितुमर्हति। तत्तद्व्यक्तित्वेनैव व्याप्तौ अप्रवेशात्। तथा च पक्षीयधूमनिष्ठव्याप्तेः कथमपि गृहीतुमशक्यत्वात्। पक्षीयधूमे तदुपनयासम्भवेन अनुमित्यनिर्वाह इति भावः।

तथा चेति - यत्पदस्य यद्रूपविशिष्टार्थकत्वे च धूमत्वविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यं

धूमत्वावच्छिन्नहेतुकानुमित्यौपयिकव्याप्तिरिति रीत्या तद्धर्मावच्छिन्नहेतुकानुमित्यौपयिकव्याप्तिशरीरे तत्तद्धर्माणां विशिष्य निवेशः कर्तव्य इत्यर्थः।

वन्ह्यादाविति दृष्टान्तार्थम्। तद्धूमेति - महानसीयधूमत्वावच्छिन्ननिरूपिताया इत्यर्थः। अस्य व्यापकताया इत्यत्र अन्वयः। तदयमर्थः - प्रथमं तावत् महानसादौ असकृत् धूमवन्ह्योः सहचारदर्शनानन्तरं महानसीयवन्ह्यादौ महानसीयधूमव्यापकत्वं गृह्यते - तदनन्तरं पक्षीयधूमसाधारणधूमत्वावच्छिन्नव्यापकत्वमपि वह्नित्वावच्छिन्ने सामान्यप्रत्यासत्या गृहीतुं शक्यते। तादृशव्यापकताघटितव्याप्तेरपि तदानीं ग्रहसम्भवेन पक्षीय धूमदर्शनानन्तरं

तत्तादृशव्याप्तिस्मरणसम्भवेन अनन्तरं परामर्शोत्पत्त्या अनुमितिनिर्वाहः स्यादिति । हेतुतावच्छेदकस्य विशिष्य

व्याप्तिघटकत्वेऽपि तादृशसाध्यसामानाधिकरण्यस्यैव व्याप्तित्वात् तस्य

च आश्रयीभूतहेतुव्यक्तिभेदेन भिन्नतया सर्वहेतुव्यक्तिसाधारण्याभावात् हेतुतावच्छेदकरूपेण अनुगतेन व्याप्तिशरीरे हेतुनिवेशो व्यर्थः। तस्य व्याप्तेः सर्व हेतुसाधारण्यसम्पादनमेव प्रयोजनम्। तच्च तन्निवेशेऽपि प्रकारान्तरेण व्याप्तिभेदस्यैव सत्वात् पूर्वोक्तदोषतादवस्थ्यमेवेति तस्य वैयर्थमेवेति शङ्क कते - न चेति - सामानाधिकरण्यस्य व्याप्तित्वपक्षे इति - साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकस्य व्याप्तित्वपक्षे तस्य अनुगतत्वेन उक्तदोषो नास्तीति सूचितम्। हेतुव्यक्तीति - महानसीयधूमादिभेदेनेत्यर्थः। अनुगतरूपेण सकलधूमव्यक्तिसाधारणधूमत्वादिनेत्यर्थः।

धूमव्यापकेति - उक्तव्याप्तेः प्रतिव्यक्तिभिन्नत्वेऽपि व्याप्तिशरीरे धूमत्वेन धूमस्य व्यापकत्वविशेषणतया निवेशे धूमत्वावच्छिन्नव्यापकवह्निसामानाधिकरण्यस्यैव भिन्नत्वेऽपि धूमत्वावच्छिन्नव्यापकवह्निसामानाधिकरण्यत्वेन सकलसामानाधिकरण्यव्यक्तीनाम् एकीकारसम्भवात्। तादृशरूपस्य च पक्षीयधूमनिष्ठव्याप्तेरपि ग्रहणसम्भवात् अनुमित्युपपत्तिर्भवति। हेतोः तत्तद्व्यक्तित्वेन व्याप्तिघटकत्वे तद्धूमव्यापकवह्निसामानाधिकरण्यत्वस्य तन्मात्रवृत्तित्वेन धूमान्तरवृत्तिसामानाधिकरण्यवृत्तित्वासम्भवेन सामान्यलक्षणाप्रत्यासत्यपि पक्षीयधूमनिष्ठव्याप्तेः प्रथमं दुर्ग्रहतैवेति अनुमित्यनुपपत्तिरिति भावः।

नन्वेवमपि यद्रूपाश्रयसमानाधिकरणेत्यादिक्रमेणैव निवेशोऽस्तु, तावतापि व्याप्तेरनुगमसम्भवेन पूर्वोक्त दोषाभावात् किं यद्रूपविशिष्टसमानाधिकरणत्वपर्यन्तविवक्षया । न च विनिगमकाभावः। विशिष्टाधिकरणत्वं नाम विशेषणावच्छिन्ननिरूपिताधिकरणत्वम्। तदपेक्षया यद्रूपाश्रयाधिकरणत्वनिवेशे यद्रूपावच्छिन्ननिरूपितत्वम् अधिकरणतायां न निवेश्यत इति लाघवात् इत्याशङ्क कायामाह - हेतुतेति। अग्रे वक्ष्यत इति - इत्थं च इदं-द्रव्यं-गुणकर्मान्यत्वे सति सत्त्वात् इति ग्रन्थे इति शेषः।

हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यनुक्त्वा तादृश- प्रतियोगितानवच्छेदको यो धर्मः इति रीत्या किमर्थमुक्तम् इत्याशङ्क कायाम् अनवच्छेदकन्हित्वादेः व्याप्तिघटकतालाभाय यो धर्म इति व्यासेन अभिधानम् - इति वक्ष्यन् तत्र अनवच्छेदकत्वरूपेणैव वह्नित्वस्य व्याप्तिघटकत्वे दोषमाह - प्रतियोगितानवच्छेदकत्वमात्रेणेति। मात्रशब्देन साध्यतावच्छेदकतावच्छेदकवह्नित्वत्वादिव्यवच्छेदः।वह्नित्वत्वादिव्यवच्छेदः।

तथा च हेतुसमानाधिकरणाबावप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्येवास्तु, न तु अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति चेदाह - प्रतियोगितानवच्छेदकेति - हेतु सामानाधिकरणाभावप्रतियोगितानवच्छेदकेत्यर्थः।

वह्निमान् इत्यनुमितिः न स्यादिति - वक्ष्यमाणयुक्त्या निरुक्तं व्याप्तिज्ञानस्य विशिष्य

वन्ह्यवगाह्यनुमितिं प्रति हेतुत्वासम्भवेन कारणाभावात् तदानीं तादृशानुमितिः नोत्पत्तिमर्हति इति भावः। (20 pages end here in original)

१०-७-२०००

ननु तादृशव्याप्तिज्ञानकाले वह्निमानित्यनुमितिरिष्यत एव को दोष इति चेत् - तत्राह - नचेष्टेति।

कदाचिदिति - कदाचित् वह्निमानित्यनुमितिः कदाचित् च द्रव्यवानित्यनुमितिश्च लोके अनुभवसिद्धा अस्ति। तत्र च नियामकाभावे व्यवस्था न स्यात् कारणवैलक्षण्यादेव हि कार्यवैलक्षण्यम्। कारणं च सर्वत्र हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवत्समानाधिकरणहेतुमानिति ज्ञानम् । तत्र च अनवच्छेदकत्वेन रूपेणैव द्रव्यत्ववह्नित्वादीनां निवेशेन उभयत्र एकरूपज्ञानस्यैव वक्तव्यतया नियमानुपपत्तेः। तत्तत्साध्यतावच्छेदकस्य विशिष्य निवेशे तु वह्नित्वावच्छिन्नविधेयताशाल्यनुमितिं प्रति वह्नित्वे अनवच्छेदकत्वावगाहिज्ञानं कारण्म्। द्रव्यत्वावच्छिन्नविधेयताशल्यनुमितिं प्रति च द्रव्यत्वे अनवच्छेदकत्वावगाहिज्ञानं कारणम् इति रीत्या नियामकस्य सुवचत्वात् न दोषः इति भावः।

ननु अनवच्छेदकत्वमात्रेण साध्यतावच्छेदकनिवेशेऽपि वस्तुतः यदा अनवच्छेदकत्वेन द्रव्यत्वं भासते तदा द्रव्यवानित्यनुमितिः। यदा च वह्नित्वं भासते तदा वह्निमानित्यनुमितिः। तथा च तद्धर्मावच्छिन्नविधेयताशाल्यनुमितिं प्रति अनवच्छेदकत्वरूपेण तद्धर्मावगहि

व्याप्तिज्ञानं कारणमित्युपेयते। तथा च नोक्तदोष इत्याशङ् कते - न चेति।

अनवच्छेदकत्वेनेति - हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेनेत्यर्थः। तत्तद्धर्मे वह्नित्वद्रव्यत्वादिरूपप्रकृतानुमितिविधेयतावच्छेदकेत्यर्थः।

परिहरति - अनवच्छेदकत्वेनेति। द्रव्यत्वादिभानस्यापि इति - अनवच्छेदकत्वं तावत् द्रव्यत्ववह्नित्वोभयसाधारणम्। तेन रूपरेण धर्मभानं चेत् - वह्नित्वभानकाले द्रव्यत्वभानमपि सम्भवति। संयुक्तसमवायरूपसन्निकर्षस्य वह्नित्व इव द्रव्यत्वेप्यक्षतत्वात्। सामान्यधर्मप्रकारकज्ञानस्थले तदाश्रयविशेषभानस्य सामग्र्यधीनतया यदा उभयोः विशेषयोः सामग्रीतौल्यं, तदा एकतरपरिशेषस्य कर्तुमशक्यत्वात् इति भावः।

निरुक्तव्याप्तौ अनवच्छेदकधर्मधर्मितावच्छेदकत्वेन यस्य धर्मस्य भानं तस्यैव अनुमितिविधेयतावच्छेदकतया भानमिति नियमः स्वीकार्यः। इत्थं च द्रव्यत्वावच्छिन्नविधेयकानुमितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवद्द्रव्यसमानाधिकरणधूमवानिति ज्ञानं हेतुः। वह्नित्वावच्छिन्नविधेयताकानुमितौ च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवद्वन्हिसमानाधिकरण धूमवानिति ज्ञानं हेतुरित्युक्तौ उक्तदोषाभावात् दूषणान्तरमाह - एवमिति। तत्तदिति -

वह्नित्वधूमत्वद्रव्यत्वावच्छिन्नव्यभिचारित्वेन हेतुज्ञान इत्यर्थः। तत्तदिति - वह्नित्वधूमत्वादीत्यर्थः।

११-७-२०००

अविरोधितयेति - समानधर्मितावच्छेदककज्ञानयोरेवप्रतिबद्ध्यप्रतिबन्धकभावाभ्युपगमेन धूमत्वं वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्याकारकव्यभिचारज्ञानस्य विशिष्य धूमत्वे वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वावगाहिव्याप्तिरीत्या अनवच्छेदकत्वांशे निर्धर्मितावच्छेदककव्याप्तिबुद्धाविति तादृशव्यभिचारस्य अनुमितिजनकज्ञानविरोधित्वरूपं हेत्वाभासत्वं दुर्घटमिति विशिष्य साध्यतावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वम् असम्भवीति विशिष्य साध्यतावच्छेदकस्य व्याप्तिशरीरे प्रवेशलाभाय प्रतियोगितानवच्छेदको यो धर्मः इत्युक्तमिति समुदितार्थः।

ननु व्यभिचारस्य हेत्वाभासत्वरक्षणार्थं व्याप्तौ गौरवाङ्गीकारः न युक्तः। तस्य हेत्वाभासत्वाभावे इष्टापत्तिसम्भवादिति चेत् तर्हि सर्वत्र व्यभिचारज्ञानकाले निराबाधा व्याप्तिधीः स्यात्। पूर्वोक्तव्याप्तिज्ञानस्य तदप्रतिबध्यत्वात्। न हि व्यभिचारज्ञानदशायां कोऽपि व्याप्तिनिश्चयमुहैति। तथा सति बहुवैयाकुली स्यात् इत्याशयात्।

यो धर्मः तदवच्छिन्नेनेत्युक्तमिति - हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्युक्तौ व्याप्तावपि अनवच्छेदकत्वधर्मितावच्छेदकतया वह्नित्वात्वादिभानात् तदवच्छिन्ने तादृशाभावप्रतियोगितावच्छेदकत्वरूपव्यभिचारावगाहिज्ञानस्य विरोधित्वमनपवादमेवेति नोक्तदोषः।

नन्वेवमपि कदचित् वह्नित्ववद्वान् कदाचिच्च वह्निमानित्यनुमित्युत्पत्तौ किं नियामकम् ? स्वरूपतो वह्नित्वनिष्ठविधेयतावच्छेदकताकानुमितौ स्वरूपतो वह्नित्वे अनवच्छेदकत्वावगाहि ज्ञानं कारणम्। वह्नित्वत्वेन तद्विधेयतावच्छेदकताकानुमितौ च तदवच्छेन्ने अनवच्छेदकत्वावगाहिज्ञानं कारणमित्यस्य व्यभिचारज्ञानविरोधित्वानुरोधेन सर्वत्रैव वह्नित्वत्वावच्छिन्ने अनवच्छेदकत्वज्ञानस्यैव कारणत्वाङ्गीकारेण दुर्वचत्वादित्यत आह - यत्रेति। तेन तेन रूपेणैवेति - वह्नित्वत्वादिनैवेत्यर्थः। व्याप्तिघटकता - व्याप्तिघटकानवच्छेदकत्वधर्मितावच्छेदकघटकता। स्वरूपत एवेति - वह्नित्त्वाद्यनवच्छिन्नवह्नित्वादीनामित्यर्थः । तत्रापि स्वरूपतः वह्नित्वविथेयतावच्छेदककस्थलीयव्याप्तावपि। विशेषणानवच्छिन्नेति - वह्नित्वत्वाद्यनवच्छिन्नेन वह्नित्वादिना घटितं यत् वह्नीतरावृत्तित्वरूपं वह्नित्वत्वं तेनैव वह्नित्वस्य अनवच्छेतकत्वविशेष्यतया निवेशः। न तु वह्नीतरावृत्तित्वेनापि अनवच्छिन्नस्वरूपत एवेत्यर्थः।

तथा चायमर्थः - वह्नित्वत्वेनैव वह्नित्वस्य व्याप्तौ प्रवेशः। परं तु वह्नित्वत्वं द्विधा भवति - स्वरूपतो वह्नित्वघटितं वह्नीतरावृत्तित्वरूपम्, वह्नित्वत्वेन वह्नित्वघटितं वह्नित्ववदितारवृत्तित्वरूपं चेति। तत्र स्वरूपतो वह्नित्वविधेयतावच्छेदककानुमितिं प्रति

वह्नीतरावृत्तित्वारूपवह्नित्वत्वावच्छिन्ने तादृशानवच्छेदकत्वावगाहिज्ञानस्य कारणत्वम्, वह्नित्वत्वावच्छिन्नविधेयतावच्छेदकताकानुमितिं प्रति च

वह्नित्ववदितरावृत्तित्वरूपवह्नित्वत्वावच्छिन्ने तादृशानवच्छेदकत्वज्ञानस्य कारणत्वमित्यभ्युपगमात् न तादृशद्विविधानुमितौ नियामकाभाव इति।

ननु लाघवात् वह्निमानित्यनुमित्यौपयिकव्याप्तिशरीरे अनवच्छेदकधर्मितया स्वरूपतो निवेश इत्येव स्वीक्रियते इति मतं दूषयति नत्विति - स्वरूपत एवेत्यनन्तरं तन्निवेश इत्यनुषज्यते।

निर्विशेषणकभानेति - जातेः यत्र विशेष्यतया भानं तत्र किञ्चिद्रूपेणैव भानमिति नियमात्।

ननु वह्नित्वत्वेन वह्नित्वस्य व्याप्तौ प्रवेशे तस्य वह्नीतरावृत्तित्वविशिष्टसकलवह्निवृत्तित्वरूपतया सकलवह्निवृत्तित्वांशपरित्यागेन वह्नीतरावृत्तित्वमात्रेण निवेश इति कथम्। किञ्च वह्नीतरावृत्तित्वमात्रस्य वह्निमात्रवृत्तितार्णत्वतद्व्यक्तित्वादिसाधारणतया तेषामेव यदा अनवच्छेदकत्वग्रहः तदा वह्निमान् इत्यनुमितिः स्यात् इति चेत् - तत्राह वन्ह्यादीतरेति - धर्मान्तरे तार्णत्वतद्व्यक्तित्वादीत्यर्थः।

तन्मात्रेति - वन्ह्यादीतरावृत्तित्वमात्रपुरस्कारेणेत्यर्थः। मात्रपदेन सकलवन्ह्यादिवृत्तिव्यवच्छेदः। तथा च वन्ह्यदिवृत्तिवह्नित्वेतरधर्मेऽपि वह्नीतरावृत्तित्वेन व्यापकतावच्छेदकत्वग्रहात् वह्निमान् इत्यनुमितिरिष्टैवेति भावः।

सकलवह्निवृत्तित्वाप्रवेशे हेतुमाह - सकलेति ।

ननु विनिगमनाविरहेण वह्नीतरावृत्तित्वं विहाय सकलवह्निवृत्तित्वरूपवह्नित्वत्वधर्मितावच्छेदकानवच्छेदकत्वप्रकारकज्ञानत्वेनैव हेतुताऽस्तु। तधा सत्यपि वह्निवृत्तित्वमित्यत्र स्वरूपेण वह्नित्वत्वेन च वह्नित्वप्रवेशमङ्गीकृत्य पूर्वोक्तद्विविधानुमित्योः उपपादनसम्भवात्। अत्रापि वह्नीतरावृत्तित्वाप्रवेशेन लाघवात् इत्याशङ् कां परिहरति - सकलवन्ह्यादिति - वह्नीतरघटादिवृत्तिद्रव्यत्वादावपि सकलवह्निवृत्तित्वस्य अक्षततया सकलवह्निवृत्तित्वमात्रपुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्य न कारणत्वं सम्भवदुक्तिकम्। तथा सति कदाचित् इन्धनादिहेतुनापि वह्नित्वावच्छिन्नविधेयकानुमितिः स्यात्, वह्नित्वस्य इन्धनव्यापकतानवच्छेदकत्वेऽपि सकलवह्निवृत्तित्वेनैवतस्य प्रवेशात्। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसकलवह्निवृत्तिमत्समानाधिकरणहेतुमानिति परामर्शस्यैव कारणतया सकलवह्निवृत्तिद्रव्यत्वादौ इन्धनव्यापकतावच्छेदकत्वस्य अक्षततया, सामान्यतः सकलवह्निवृत्तित्वावच्छिन्ने इन्धनव्यापकत्वावगाहिपरामर्शादपि वह्निमानित्यनुमितिः स्यात्। न चेष्टापत्तिः। इन्धनस्य वह्निव्यभिचारित्वेन अभ्रान्तानां तल्लिङ्गकवन्ह्यनुमितिस्वीकारासम्भवात्। अतः वह्नीतरावृत्तित्वेनैव वह्नित्व अनवच्छेदकत्वावगाहिज्ञानस्य कारणत्वं स्वीकार्यम्। तथा सति द्रव्यस्य वह्नीतरवृत्तित्वेन तद्व्युदासात् न इन्धनादिना वह्नित्वावच्छिन्नानुमित्यापत्तिरिति समुदितार्थः।

ननु वह्नित्वमात्रवृत्तिधर्मपुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्यैव हेतुत्वमस्तु लाघवात्,

किमर्थं वह्नीतरावृत्तित्वं पुरस्कृत्येत्युक्तमिति चेत् आह - वह्नित्वादीति। तेन रूपेणेति। तद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादिनेत्यर्थः। अनुभवविरुद्धेति - तथा च तादृशरूपेण

अनवच्छेदकत्वग्रहस्य हेतुत्वं न स्वीकार्यमिति भावः। तत्र हेतुमाह - येनेति - वह्नीतरावृत्तित्वेनेत्यर्थः। तृतीयार्थः - प्रकारत्वम्। तस्य उपस्थितावन्वयः। उपस्थित इति क्तप्रत्ययस्य विषयतावानर्थः। तथा च यद्रूपप्रकारक उपस्थितिविशेष्ये वह्नित्वादावित्यर्थः। न जायत इति - नोत्पत्तुमर्हतीत्यर्थः।

१२-७-२०००

यादृशधर्मविषयकत्वं इतरवृत्तित्वग्रहप्रतिबध्यताप्रतिबन्धकतोभयावच्छेदकं तादृशधर्मपुरस्कारअनवच्छेदकत्वग्रहः कारणम्। वह्नीतरावृत्तिप्रकारकवह्नित्वविशेष्यकनिश्चयत्वं वह्नित्वविशेष्यकवह्नीतरवृत्तित्वप्रकारकज्ञानप्रतिबन्धकतावच्छेदकं प्रतिबध्यतावच्छेदकं च भवति , तदभावावगाहिज्ञानत्वात्। प्रतिबन्धकतावच्छेदकत्वमात्रोक्तौ - वह्नीतरावृत्तित्वव्याप्यवत्त्वेन वह्नित्वविषयकनिश्चयस्यापि तदभावव्याप्यवत्तानिश्चयविधया वह्नित्वविशेष्यकवह्नीतरवृत्तित्वप्रकारकज्ञानप्रतिबन्धकतया वह्नीतावृत्तित्वव्याप्यवत्त्वस्यापि तादृशधर्मत्वापत्तिर्भवेदिति प्रतिबध्यतावच्छेदकत्वनिवेशः। तथा च सति उक्तव्याप्यवत्त्वविषयतायाः इतरवृत्तिग्रहप्रतिबध्यतावच्छेदकत्वाभावात् न दोषः। पूर्वोक्तवह्नित्वनिष्ठतद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादिना वह्नित्वादिज्ञानस्य च वह्नित्वे इतरवृत्तित्वग्रहं प्रति तदभावाद्यनवगाहित्वेन अविरोधित्वात् न दोषः।

ननु वह्नीतरावृत्तित्वेन वह्नित्वज्ञानस्य निर्धर्मितावच्छेदकतया तस्य कथं वह्नित्वे इतरवृत्तित्वग्रहप्रतिबन्धकत्वं

इति चेत् - एवमर्थः - स्ववृत्तियद्रूपावच्छिन्नविशेष्यकेतरवृत्तित्वप्रकारकसंशयस्य आहार्यत्वनियमः तादृशरूपावच्छिन्नविशेष्यकेत्यादिरीत्या निवेश्यम्।

वह्नीतरावृत्ति/वह्नीतरावृत्ति नवेति संशयस्य स्वविरुद्धधर्मधर्मितावच्छेदकस्वप्रकारकज्ञानत्वेन आहार्यत्वनियमात् समन्वयः। एवमपि पूर्वोक्तविवक्षैव कार्या । तत्र च सधर्मितावच्छेदककत्वाभावेऽपि निधर्मितावच्छेदककज्ञानस्यापि समानविष्यकज्ञानप्रतिबध्यत्वं दृष्टम्। उभयोरपि ज्ञानयोः निधर्मितावच्छेदकत्वेन अदोषादिति भावः।

अत एव येनरूपेणेत्यादिना स्वरूपतो/वह्नित्वविधेयतावच्छेदककानुमितौ नियामकस्य उक्तत्वादेव।

ज्ञानत्वत्वेति - व्यापकताज्ञानकारणत्वस्वीकारे हेतुसामानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकेति रीत्या व्याप्तिज्ञानं वाच्यम्। तत्र च अनवच्छेदकत्वधर्मितावच्छेदकतया वह्नित्वत्वभानं उपेयम्। अन्यथा निर्धर्मितावच्छेदककानवच्छेदकत्वज्ञानस्य वह्नित्वत्वावच्छिन्ने

हेतुसमनाधिकरणाभावप्रतियोगितावच्छेदकत्वरूपव्यभचारग्रहप्रतिबध्यत्वाभावप्रसङ्गात्। तथा च यद्धर्मावच्छिन्ने अनवच्छेदकत्वग्रहः कारणम् तद्धर्मावच्छिन्नविधेयतावच्छेदकत्वम् अनुमितेः,

अन्यथा अतिप्रसङ्गः। तथा च किञ्चिद्रूपेण वह्नित्वावगाहिज्ञानात् कथं स्वरूपतो वह्नित्वविधेयतावच्छेदकानुमितिः।

एवं ज्ञानसाध्यकस्थलेऽपि ज्ञानत्वत्वावच्छिन्ने व्यापकतावच्छेदकत्वज्ञानात् ज्ञानवानित्यनुमितिः न स्यात्। किञ्चिद्रूपेणव्यापकतावच्छेदकत्वज्ञानादपि स्वरूपतो ज्ञानत्वविधेयतावच्छेदककानुमित्युपगमे ज्ञानत्वत्वेनेव अनुभवत्वव्यापकगुणत्वव्याप्यजातित्वेन अनवच्छेदकत्वावगाहिपरामर्शादपि ज्ञानवानयं इत्यनुमितिः स्यात्। उभयोरपि धर्मयोः ज्ञानत्वमात्रवृत्तित्वेन एकतरधर्मस्य विशेषाभावात्।

तथा च स्वरूपतो ज्ञानत्वावगाहिज्ञानवानित्यनुमित्यनिर्वाहात्। व्यापकताज्ञानस्य कारणत्वं न सम्यगिति केवलान्वयिग्रन्थे दीधिकृता वक्ष्यमाणं दूषणं निरस्तं वेदितव्यम्। कुत इति चेत् - ज्ञानवानित्यनुमितौ ज्ञानेतरावृत्तित्वरूपज्ञानत्वत्वावच्छिन्ने अनवच्छेदकत्वज्ञानं कारणम्। न च अनुभवत्वव्यापकगुणत्वव्याप्यजातित्वेन अनवच्छेदकत्वज्ञानमपि कारणं भवितुमर्हति। ज्ञानत्वे येन उपस्थिते तत्र ज्ञानत्वोपस्थितावपि ज्ञानत्वे ज्ञानेतरसाधारण्यसंशयसम्भवेन तस्यातथात्वेन दीधितिकृदुक्तदोषानवतारात्। अधिकमग्र इति - केवलान्वयिखण्डनग्रन्थव्याख्यानावसरे इत्यर्थः।

१३-७-२०००

इदमत्र बोध्यम् - तद्धर्मावच्छिन्नेतरावृत्तित्वेन रूपेण व्यापकतावच्छेदकत्वज्ञानात् तद्धर्मप्रकारेण साध्यानुमितिः। तत्र इतरत्वप्रतियोगितावच्छेदकतया तद्धर्मस्य यादृशं अनुमितावपि तस्य तादृशं भानमिति नियमः। तथा च व्यापकतावच्छेदकज्ञानत्ववदितारावृत्तिधर्मवत्समानाधिकरणहेतुमानिति ज्ञानात् ज्ञानत्ववद्वान् अयम् इत्यनुमितिः, व्यापकतावच्छेदकज्ञानेतरावृत्तिधर्मवत्समानाधिकरणहेतुमानयम्त्यादि ज्ञानाच्चज्ञानवानयमित्याद्यनुमितिरिति वायपकताज्ञानकारणत्वपत्रे न कोऽपि दोष इति।

ननु पूर्वं प्रकृतानुमितिविधेयतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकरूपरावच्छिन्नानुयोगिताकहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानस्य कारणत्वं निष्कृष्य तदनु तेन तेन रूपेणेत्यादिना स्वरूपरतो वह्नित्वादिविधेयतावच्छेदकताकानुमित्यनुपपत्तिः ग्रन्थकृतैव वक्ष्यत इति स्वयमेव तादृशानुमित्यनिर्वाहं कथमभ्युपगतवान् - इदानीं तत्र नियामककथनादिति चेत् -

उच्यते - तत्र हि व्यापकताज्ञानीयसाध्यतावच्छेदकवृत्तिविषयताया एव अनुमितौ स्वसजातीयसाध्यकतावच्छेदकवृत्तिवषयतानियामकत्वमिति मते न तथोक्तम्। तथा सति वह्नित्वत्वेन अनवच्छेदकत्वज्ञानात् वह्नित्वद्वान् इत्येवानुमितिः स्यात्, न तु वह्निमानित्यनुमितिरिति। इतानीं च अनवच्छेदकत्वधर्मितावच्छदककोटिप्रविष्टवह्नीतरावृत्तित्वघटकवह्नित्वविषयताया एव

सजातीयानुमितिविषयताप्रयोजकत्वमिति स्वीकारेण तादृशानुपपत्त्यभावात्।

दीधितौ तद्धर्मावच्छिन्नसामानाधिकरण्यमित्यनुक्त्वा तद्धर्मावच्छिन्नेन येन केनापि इत्युक्तेः

यावन्निरूपरेतेत्युक्तेश्च फलं दर्शयति - तत्तद्व्यक्तीति - महानसवह्न्यादिसामानाधिकरण्यम्। तत्त्द्व्यक्तिगमकतेति ।

महानसीयवह्न्याद्यनुमितिजनकताप्रयोजकमित्यर्थः।

अयमाशयः - सामानाधिकरण्यस्य व्याप्तित्वे पर्वते वह्न्यनुमितिं प्रति पर्वतीयधूमे पर्वतीयवह्निसामानाधिकरण्यस्यैव प्रयोजकत्वम्। एवं महानसीय वह्न्यनुमितौ महानसीयधूमे तत्समानाधिकरण्यस्येति रीत्या वक्तव्यमिति।

तथा सति दोषमाह - पर्वतीयेति । पर्वतीयधूमे महानसीयवह्निसामानाधिकरण्याग्रहेऽपि वह्नित्वेन पर्वतीयवह्निसामानाधिकरण्ग्रहादपि वह्नेः महानसीयत्वे लाघवमिति लाघवज्ञानसहकृतात् पर्वतो महानसीयवह्निमान् इत्यनुमितिरिष्टा । सा च नोपपद्येत् तद्वह्निसामानाधिकरण्यस्य अग्रहात्। अतः येन केनापीति - तथा च व्यक्तिनियमो नापेक्षित इति भावः।

तद्धर्माश्रययत्किञ्चिद्व्यक्तिसामानाधिकरण्यस्यैव यावद्व्यक्तिगमकताप्रयोजकत्वं इष्यते, तद्धर्माश्रय तद्व्यक्तिसामानाधिकरण्यं यावद्व्यक्तिगमकताप्रयोजकम् इत्युक्तावपि व्यक्त्यन्तरसामानाधिकरण्यस्य अप्रयोजकतापत्तिः। अतः अनियमेन सामानाधिकरण्यसामान्यस्य प्रयोजकस्य प्रयोजकतालाभाय येन केनापाति।

एवं तद्व्यक्तिगमकताप्रयोजकमित्युक्तौ व्यक्त्यन्तरागमकत्वं लभ्येत। अतः यावन्नरूपितेति। तद्रूपावच्छिन्नस्येति - धूमत्वावच्छिन्नस्येत्यर्थः। तद्धर्मावच्छिन्नेति - वह्नित्वाद्यवच्छिन्नेत्यर्थः। यथाश्रुतार्थे दोषस्य वक्ष्यमाणत्वात् गमकताप्रयोजिका व्याप्तिरित्युक्तम्। यथाश्रुतार्थस्वीकारे बाधकमाह - यथाश्रुत इति । तद्रूपविशिष्टनिष्ठं तद्धर्मावच्छिन्नेन येन केनापि सामानाधिकरण्यम् - तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्युक्तौ यत्किञ्चित्साध्यव्यक्तिसामानाधिकरण्यस्य धूमनिष्ठस्य

यावत्साध्यव्यक्तिप्रतियोगिकत्वाभावेन असङ्गतिः स्यात् इति तथोक्तम्।

नानाव्यक्तिसाध्कस्थले साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वनिवेशेन अव्याप्तिरुद्भता। तथापि साध्यतावच्छेदकस्य नानात्वस्थले अव्याप्तिरस्त्येवेति शङ् कते यत्रेति -

१४-७-२०००

दण्डिमान् दण्डिसंयोगादित्यत्र साध्यतावच्छेदकदण्डव्यक्तीनां नानात्वेन सकलहेत्वधिकरणवृत्तितायाम् एकस्य अवच्छदकत्वासम्भवेन दण्डत्वावच्छिन्नेऽपि व्यापकतावच्छेदकत्वं न सम्भवति। चालिनीन्यायेन दण्डिसंयोगाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वस्य तत्तद्दण्डव्यक्तौ सत्त्वे दण्डत्वविशिष्टेऽपि अवच्छेदकत्वाभावासत्त्वात्। विशेष्यवृत्तेः विशिष्टानुयोगिकाभावास्वीकारादिति भावः।

एतच्चेति - साध्यसम्बद्धधर्मस्यैव व्यापकतावच्छेदकत्वनियमादिति भावः।

साध्यतावच्छेदकमिति दीधितिग्रन्थस्य व्यापकतावच्छेदकं इत्यर्थवर्णनं किमर्थं ?

यथाश्रुतार्थाङ्गीकारे किं बाधकमिति चेत् पूर्वोक्ताशंकायाः परिहारार्थं खल्वयं ग्रन्थः। स च व्यापकतावच्छेदकत्वोपपादनेनैव भवेदिति तात्पर्यार्थः वर्णितः। साध्यतावच्छेदकमित्युक्तावपि

एतादृशांशोपपादनं विना अव्याप्तिशंकापरिरााभावात्। सखण्डधर्मव्यवच्छेद इति - दण्डरूपधर्मस्य साध्यतावच्छेदकत्वव्यवच्छेद इत्यर्थः।

तत्रेति - दण्डादिरूपसखण्डधर्म इत्यर्थः। प्रतियोगितेति । दण्डिसंयोगादिरूपहेतुसमानाधिकरणाभावप्परतियोगितानवच्छेदकत्वस्येत्यर्थः। न क्षतिरिति । साध्यतावच्छेदकधर्म एव प्रतियोगितानवच्छेदकत्वमहेक्षितम्। साध्यतावच्छेदकं चात्र परम्परासम्बद्धदण्डत्वमेव। तत्र च अनवच्छेदकत्वम् अक्षतमिति भावः।

नन्वेवं दण्डिमानित्यनुमितिः न स्यात्। तद्धर्मावच्छिन्नविधेयताशाल्यनुमितं प्रति तद्धर्मे व्यापकतावच्छेदकत्वावगाहिपरामर्शस्य कारणताया प्रकृते दण्डत्वस्यैव व्यापकतावच्छेदकत्वसमर्थनेन तत्रैव तदवगाहिज्ञानात् दण्डत्वावच्छिन्नविधेयताशालिन्याः दण्डत्ववद्वान् इत्यनुमितेरेव सम्भवात् इत्याशंकाम् इष्टापत्त्या निराकुरुते - दण्डत्वादिनैवेति। एवकारेण दण्डप्रकारकत्वव्यवच्छेदः।

प्रमात्मकपरामर्शादपि तादृशानुमितिमुपपादयति - स्वाश्रयेत्यादिना। स्वसमायिसंयोगसम्बन्धेन यत्र धर्मे दण्डत्वादौ व्यापकतावच्छेदकत्वग्रहः हेतुसमानाधिकरणाभवप्रतियोगितानवच्छेदकत्वग्रहः।

तद्विशिष्टेति - दण्डत्वविशिष्टदण्डप्रकारेण्। तृतीयायाः अवच्छिन्नत्वमर्थः। तस्य च साध्यावगाहीत्यत्र

विषयतायामन्वयः। सामानाधिकरण्येति - व्याप्तिघटकसामानाधिकरण्यप्रतियोगितया। साध्यावगाहीति - दण्डिरूपप्रकृतसाध्यावगाहीत्यर्थः। तद्धर्मविशिष्टेति - दण्डत्वविशिष्टेत्यर्थः।

अयं भावः - तद्धर्मावच्छिन्नविधेयतावच्छेदककानुमितित्वावच्छिन्नं प्रति हेतुसमानाघधिकरणाभावप्रतियोगितानवच्छेदकतद्धर्मावच्छिन्नविशिष्टसमानाधिकरणहेतुमान् इत्याकारकपरामर्शस्य कारणत्वम्। तथा च दण्डत्वावच्छिन्नदण्डनिष्ठविधेयतावच्छेदकताकानुमितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यत् दण्डत्वं तदवच्छिन्नः यो दण्ड।, तद्विशिष्टः दण्डी तत्समानाधिकरणगेचुमानिति ज्ञानं कारणम्। अत्र च सामानाधिकरण्यप्रतियोगी दण्डी । स च दण्डत्वविशिष्टदण्डदण्डप्रकारेण भासत इति समन्वयः।

एवं च एतादृशपरम्परासम्बद्धधर्मसाध्यतावच्छेदककस्थल एव एवंविधविलक्षणकार्यकारणभावस्वीकारः न सर्वत्र। न चाननुगमः। साध्यतावच्छेदकभेदेन व्याप्तिभेदात्। तथा च निरुक्तज्ञानस्य प्रमात्मकतया भ्रमं विनैव दण्डिमानित्यनुमितिनिर्वाहः इति।

ननु स्वाश्रयेत्यादिनिरुक्तौ स्वसमायिसंयोगसम्बन्धेन दण्डत्व व्यापकतावच्छदकत्वं गृह्यते चेत् तेन सम्बन्धेनैव तस्य साध्यतावच्छदकतया भानमेष्टव्यम्। येन सम्बन्धेन यस्य व्यापकतावच्छेदकत्वं तेन सम्बन्धेन तस्य अनुमितिविधेयतावच्छदकत्वमिति। नियमस्य

वह्निमानित्यनुमितौ दृष्टत्वात्। तथा च दण्डिमानित्याकारः कथं ? दण्डत्ववद्वानित्याकारस्यैव स्वीकरणीयत्वादिति चेत् दण्डिमानित्यनुमित्यनुरोधेन यादृशपरम्परासम्बन्धेन यादृशसम्बन्धेन

स्वाश्रयः निविष्टः तादृशसम्बन्धेन तद्विशिष्टस्य साध्यतावच्छेदकस्य यादृशसम्बन्धेन तदाश्रयश्च निविष्टः तादृशसम्बन्धेन सामानाधिकरण्यप्रतियोगितावच्छेदकतया भानस्य तस्य तस्य अनुमितौ तादृशसम्बन्धेन भाननियामकत्वमुपेयते। प्रकृते स्वसमवायियसंयोगसम्बन्धेन दण्डत्वे अनवच्छेदकत्वस्वीकारात् परम्पराप्रविष्टस्वपरदार्थदण्डत्वस्य समवायेन आश्रयः दण्डः संयोगेन दण्डाश्रयः दण्डी च व्याप्तौ प्रविष्टः दण्डिमानित्यनुमितौ दण्डिनि तादृशसंयोगेन दण्डः तत्र च तादृशसमवायेन दण्डत्वं च विशेषणतया भासत इति नियमसङ्गतिः। एतावता उक्त चोद्यस्य कः परिहार इति चेत् - परम्परास्थले

सामानाधिकरण्यप्रतियोगितावच्छेदकघटकतया व्यापकतावच्छेदकस्य यादृशं भानं तादृशमेव अनुमितावपि तथेति कल्प्यते। अन्यत्र तु पूर्वोक्तरीत्या, स्थलभेदेन कारणभेदाङ्गीकारे अदोषादिति।

वस्तुतस्तु परम्परासम्बन्धेन भानस्थलेऽपि परम्पराघटकानां विशेषणविशेध्यभाव आवश्यकः।यथा विशिष्टसत्तावानिति विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणस्य परम्परासम्बन्धेन धर्मिणि भानेऽपि परम्पराघटकसत्तायाः स्वांशे विशेष्यत्वं धर्म्यंशे विशेषणत्वं च, तथा प्रकृतेऽपि दण्डत्वस्य परम्पराया साध्तावच्छेदकतया भानं दण्डिमानित्याकारकतायामपि निर्वहत्येव।

२६-७-२०००

नन्वेवमपि व्यापकतावच्छेदकत्वघटकाभावप्रतियोगितावच्छेदकतावच्छेदकसंसर्गविधयताया एव किल साध्यतावच्छेदकभानप्रयोजनकत्वं इति चेत् - उक्तरीत्या संसर्गघटकेऽपि विशेषणविशेष्यभावस्वीकारात् विशेषणवृत्तिविषयतात्वेन संसर्गप्रकारविषयत्वयोः एकीकारात् विशेषणवृत्तिसंसर्गिकविषयताया अपि अनुमितौ साध्यतावच्छेदकस्य विधेयतावच्छेदकताप्रयोजकत्वम् अङ्गीक्रियत इति।

ननु दण्डत्वस्य व्यापकतावच्छेदकत्वोपगमाभावेऽपि दण्डिमान् दण्डिसंयोगादित्यत्र दण्डिसंयोगाधिकरणवृत्त्यभावः तत्तद्दण्ड्यभावः तत्प्रतियोगितावच्छेदकं तत्त्वविशिष्टदण्डः तदनवच्छेदकत्वं दण्डत्वविशिष्टस्य। यथा वह्निमान् धूमादित्यत्र धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य महानसीयत्वसहितवह्नित्वे सत्त्वेऽपि तदनवच्छेदकत्वं शुद्धवह्नित्वरूपसाध्यतावच्छेदकस्य तद्वदिति। दण्डत्वस्यैव व्यापकतावच्छेदकत्वसम्भवात् दण्डत्वस्य तथात्वस्वीकारः विफल इति शंकते अथेति। अवच्छेदककोटिप्रविष्टेषु सर्वेषु अवच्छेदकतापर्याप्तिरित्याशयेन इयं शंका। तद्दण्डी नास्तीति बुद्धौ तत्त्वोपलक्षितदण्डस्यैव प्रतियोगितावच्छेदकत्वपर्याप्तिः भासते, न तु तत्त्वांशेऽपि तत्त्वोपलक्षितदण्डव्यक्तेरेव तद्दण्ड च्यभावप्रतियोगितावनतिप्रसक्तत्वेन अवच्छेदकत्वसम्भवे गौरवेण तत्त्वांशेऽपि अवच्छेदकत्वास्वीकारात्। एवं च विशेष्यस्य दण्डस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वेऽपि दण्डत्वविशिष्टेऽपि दण्डे अनवच्छेदकत्वं दुर्घटम्। विशेष्यवृत्तिधर्मप्रतियोगिकविशिशिष्टानुयोगिकाभावस्य अप्रामाणिकत्वात्।

महानसीयवह्न्यभावप्रतिपत्तियोगितायां तु महानसीयत्वोपलक्षितस्यापि वह्नित्वस्य अतिप्रसक्ततया तन्मात्रे प्रतियोगितावच्छेदकतापर्याप्त्यसम्भवेन महानसीयत्वान्तर्भावेन अवच्छेदकत्वपर्याप्तिस्वीकारः आवश्यक इति शुद्धवह्नित्वादौ अनवच्छेदकत्वं सुघटमेव।

एवं च दण्डत्वस्य व्यापकतावच्छेदकत्वस्वीकारः आवश्यक इति शंकते - न चेति। अत्र च प्रतियोगिविषेणस्यैव साक्षादवच्छेदकत्वं तद्विशेषणस्य तु तन्निष्ठावच्छेदकतावच्छेदकत्वमेव इत्यभिप्रायेण प्रतियोगितावच्छेदकांशे भासमानत्वे सति अनवच्छेदकत्वं उपलक्षणत्वम्। तथात्वे सति अवच्छेदकत्वं विशेषणत्वं चेत्यभिप्रायः।

तत्त्वोपलक्षितदण्डाभावः तद्विशिष्टदण्डाभावः महानसीयवह्न्यभावः इत्यभावत्रये क्रमेण तत्त्वानवच्छिन्नावच्छेदकत्वं दण्डस्य, द्वितीये तत्त्वावच्छिन्नावच्छेदकत्वं दण्डस्य, तृतीये महानसीयत्ववह्नित्वयोः व्यासज्यवृत्त्यवच्छेदकत्वं च। तत्र अव्यासज्यवृत्तिनिरवच्छिन्नावच्छेदकतायां तदाश्रयाधिकरणतायाः, सावच्छिन्नतादृशावच्छेदकतायां तदवच्छिन्नाधिकरणतायाः, व्यासज्यवृत्त्यवच्छेदकतायां च तदाश्रय एकविशिष्टापराधिकरणतायाः प्रतियोगितामतिप्रसक्तत्वं तन्त्रम्।

आद्ये तत्त्वोपलक्षितदण्डाधिकरणतायाः तद्दण्डिमात्रनिष्ठायाः तद्दण्ड्यभावप्रतियोगितायां, द्वितीये तत्त्वावच्छिन्नदण्डाधिकरणतायाः तादृशविशिष्टाभावप्रतियोगितायां, तृतीये महानसीयत्वसहितवह्नित्वाधिकरणतायाः महानसीयवह्न्यभावप्रतियोगितायां च अनतिप्रसक्तत्वात्

समन्वय इत्यभिप्रायेण समाधत्ते - स्वरूपत इति - स्वरूपतः किञ्चिद्रूपानवच्छिन्नत्वेन, एक एवकारेण किञ्चिद्रूपेण भासमानस्य स्वरूपतोऽवच्छेदकत्वव्यवच्छेदः, स्वरूपतोऽवच्छेदकतायाः - अनवच्छिन्नावच्छेदकतायाः इत्यर्थः।

सखण्डपदार्थस्येति - स्वरूपतो भानानर्हपदार्थस्येत्यर्थः। तथात्वं च जात्यखण्डोपाध्यतिरिक्तानां किञ्चिद्रूपेणैव भानमिति नियमात्। स्वरूपतोऽवच्छेदकत्वासम्भवेनेति।

किञ्चिद्रूपेणैवच्छेदकत्वादित्यर्थः। तत्र च कीदृशरूपविशिष्टस्य अवच्छेदकत्वं वाच्यमिति चेत् आह - दण्डत्वादीति।

तद्दण्ड्यभावप्रतियोगिताशून्यदण्डान्तरवत्यपि पुंसि दण्डत्वविशिष्टस्य दण्डस्य सत्त्वेन अतिप्रसक्ततया तत्त्वविशिष्टस्यैव दण्डस्य अवच्छेदकत्वं वाच्यम्। तथा च तत्तान्तर्भावेनैव प्रतियोगितावच्छेदकत्वपर्याप्तिः। दण्डत्वविशिष्टस्य तु अवच्छेदकतापर्याप्त्यनधिकरणत्वमं अनपवादमेवेति दण्डत्वस्य व्यापकतावच्छेदकत्वानुसरणं व्यर्थमेवेति। तथा च तत्त्वस्य उपलक्षणत्वेऽपि प्रतियोगितावच्छेदकान्तर्भावः आवश्यक इति भावः।

अवच्छेदककोट्यप्रविष्टस्य उपलक्षणस्य अभावप्रतियोगितावच्छेदककोटौ भानाङ्गीकारे बाधकमाह - अभावेति।

उपलक्षणीभूतधर्मान्तरस्येति - स्वयमवच्छेदककोट्यप्रविष्टस्यैव धर्मान्तरस्येत्यर्थः। तेन अवच्छेदककोटिप्रविष्टस्य भानेऽपि न विरोधः।

दण्डत्वमात्रमिति -अस्य विषयीकृत्येत्यत्र अन्वयः। दुर्वारत्वादिति।

दण्डी नास्तीति प्रत्यये विषयः तद्दण्डावच्छिन्नप्रतियोगिताकाभावः। वस्तुतः तादृशाभावस्य तत्त्वविशिष्टदण्डावच्छिन्नप्रतियोगिताकत्वेऽपि अवच्छेदकानन्तर्भूतस्यापि उपलक्षण्सय अभावप्रतियोगितावच्छेदककोटौ भानस्वीकारे चस तद्दण्डांशे दण्डत्वम् उपलक्षणतया विषयीकृत्य तादृशप्रतीतिः निराबाधैव स्यात्। यदि च तादृशम् उपलक्षणं नास्ति, यदनवच्छेदकं सदपि भासेत अपि तु अवच्छेदकमेव तदपि इत्युपगमे दण्डी नास्तीत्यत्र दण्डत्वविशिष्टदण्डावच्छिन्नप्रतियोगिताकाभावस्यैव विषयत्वं स्वीकरणीयम्। तादृशश्च अभावः न तद्दण्ड्यभावः। तस्य तत्त्वविशिष्टदण्डावच्छिन्नप्रतियोगिताकत्वात् इति तदभावतात्पर्येण दण्डिमति दण्डी नास्तीति प्रत्ययः नापादयितुं शक्य इति बोध्यम्।

अस्मिन् पूर्वपक्षे केषाञ्चित् समाधानमाह - केचित्विति। उक्तानुशयेनैव - उक्तास्वरसेनैवेत्यर्थः।

तथा च दण्डमान् दण्डिसंयोगादित्यत्र अवायप्त्यभावे इष्टापत्तिरेव। आदिपदग्राह्यस्थल एव अव्याप्तिवारणाय परम्परासम्बद्धधर्मस्य व्यापकतावच्छेदकत्वानुधावनं दीधितिकृतामित्याशयः।

पृथिवीत्वादिति - पृथिवीत्वव्याप्यजातिमद्वान् समवायेन पृथिव्याः इत्यत्र समवायेन घटरूपपृथिव्यधिकरणे कपाले पृथिवीत्वव्याप्यजातित्वाविशेषितपटत्वावच्छिन्नाभावः तत्प्रतियोगितावच्छेदकं पटत्वम्। एवं समवायेन पटरूपपृथिव्यधिकरणे तन्तौ वित्यमानः स्वरूपतः घटत्वावच्छिन्नाभावः तत्प्रतियोगितावच्छेदकं घटत्वम् इत्येवंरीत्या सर्वासामेव

पृथिवीत्वव्याप्यजातीनां साध्यतावच्छेदकव्यक्तीनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्यप्तेः सत्त्वेन तदनवच्छेदकत्वासम्भवेन अव्याप्तिः भवति। तद्वारणाय परम्परासम्बन्धेन पृथिवीत्वव्याप्यजातित्वस्य व्यापकतावच्छेदकत्वानुकरण्म्। तथा सति प्रत्येकं घटत्वपटत्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्त्वेऽपि पृथिवीत्वव्याप्यजातिमान्नास्तीति प्रतीतिसिद्धाभावस्य क्वापि हेत्वधिकरणे असत्त्वेन पृथिवीत्वव्याप्यजाचित्वस्य व्यापकतावच्छेदकत्वं अक्षतमेवेति भावः।

पूर्वं दण्डादेः सखण्डधर्मत्वेन तद्दण्डी नास्तीत्यत्र अभावप्रतियोगितावच्छेदककोटौ स्वरूपतो भानासम्भवेन स्वरूपतोऽवच्छेदकत्वासम्भवात् तत्तादेः प्रतियोगितावच्छेदकतास्वीकारः आवश्यक आसीत्।

अत्र तु घटत्वादीनां जातित्वेन स्वरूपत एव अवच्छेदकत्वसम्भवेन अनवच्छेदकत्वं तादृशजातित्वविशिष्टेऽपि दुर्घटम्। विशेष्यवृत्तीति न्यायादिति बोध्यम्। आहुरित्यनेन आदिपदग्राह्यस्थले दोषवर्णनम् अस्वरसबीजं सूचितम्।

पूर्वं तद्दण्डी नास्तीति प्रत्ययविषयाभावप्रतियोगितावच्छेदकतायाः दण्डत्वविशिष्टे अतिप्रसक्ततया असम्भवेन तत्तविशिष्टस्यैव अवच्छेदकत्वं वाच्यम्। तत्र तत्तायां दण्डे च साक्षात्प्रतियोगितावच्छेदकत्वपर्याप्तिः तदनधिकरण्त्वं दण्डत्वविशिष्टस्येत्युक्तम्।

ये तु तद्दण्डवान्नास्तीत्यादिप्रतीतौ प्रतियोगिनि साक्षाद्विशेषणतया भासमानदण्ड एव

प्रतियोगितावच्छेदकत्वम्। दण्डविशेषणतत्त्वादौ तु तादृशप्रतियोगितावच्छेदकतावच्छेदकत्वमेव न तु तत्तान्तर्भावेन प्रतियोगितावच्छेदकत्वपर्याप्तिः। तद्दण्ड्यभावप्रतियोगिता तद्दण्डनिष्ठा तद्व्यधिकरण्स्य तत्त्वस्य प्रतियोगितावच्छेदकत्वासम्भवात्। न च दण्डस्य स्वरूपतोऽवच्छेदकत्वमिष्यते। तत्त्वावच्छिन्नस्यैव अवच्छेदकत्वस्वीकारात्। तथा च साध्यतावच्छेदकीभूत सकलदण्डव्यक्तिष्वेव हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्तमत्त्वेन तदनवच्छेदकत्वं दण्डत्वविशिष्टेऽपि दुर्घटमिति दण्डत्वस्य व्यापकतावच्छेदकत्वाभ्युपगमः इति वदन्ति। तेषां मतमाह - अन्येत्विति।

तद्विशेषणेति - प्रतियोगिविशेषणदण्डादिविशेषणतत्त्वादावित्यर्थः। तदवच्छेदकेति। प्रतियोगितावच्छेदकतावच्छेदकत्वमेवेत्यर्थः। अत्र हुतुमाह - प्रतियोगितेति। तदवच्छेदकेति। प्रतियोगितावच्छेदकत्वासम्भवेनेत्यर्थः। तदन्तर्भावेनेत्यादि - प्रतियोगितावच्छेदकतावच्छेदकान्भावेन प्रतियोगितावच्छेदकतापर्याप्त्यसंभवादित्यर्थः।

शंकते - न चेति। अनवच्छिन्नम् अवच्छेदकत्वमेवेति। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं इत्यत्र यदवच्छेदकत्वं प्रविष्टम्। तत्र किञ्चिदनवच्छिन्नत्वं निवेशयम्।

तथा च हेतुसमानाधिकरणाभावप्रतियोगितानिरूपितनिरवच्छिन्नावच्छेदकत्वाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति समुदितार्थः।

एवं च दण्डमान् दण्डिसंयोगादित्यत्र सर्वास्वेन साध्यतावच्छेदकीभूतदण्डव्यक्तिषु हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसत्त्वेऽपि तादृशाभावप्रतियोगितायां सखण्डस्य दण्डादेः तत्त्वावच्चिन्नस्यैव अवच्छेदकतया तादृशप्रतियोगितानिरूपितनिरव्चचिन्नावच्छेदकत्वाभाववत्तत्वमक्षतमेवेति उक्तविविक्षामन्तरेणैव निर्वाह इति शंकितुराशयः।

समाधत्ते - सखण्डेति। दण्डिमान् द्रव्यत्वादित्यादौ इत्यर्थः। तत्र द्रव्यत्वरूपहेत्वधिकरणे दण्डशून्यभूतलादौ दण्ड्यभावसत्त्वेऽपि तादृशाभावप्रतियोगितायां दण्डस्य सखण्डस्य स्वरूपतः अवच्छेदकत्वासम्भवेन दण्डत्वेनैव अवच्छेदकत्वस्य उपगन्तव्यतया हेतुसमानाधिकरणाभावप्रतियोगितानिरूपितनिरवच्छिन्नावच्छेदकताघून्यत्वात् अतिव्याप्तिः। अतः उक्तरीत्या निवेशासम्भवेन यथाश्रुते च पूर्वोक्तरीत्या दण्डिमान् दण्डसंयोगादित्यत्र दण्डादेरनवच्छेदकत्वं दुरुपपादमिति दण्डत्वस्य व्यापकतावच्छेदकत्वविवक्षा आवशक्येवेति

भावः।

ननु दण्डिमान् द्रव्यत्वादित्यत्र निरवच्छिन्नावच्छेदकताशून्यत्वनिवेशपक्षे कथमतिव्याप्तिः सङ्गच्छते। हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नस्य रूपवान् पृथिवीत्वादित्यादौ

हेत्वधिकरणघटादौ

विष्यितया रूपत्वविशिष्टज्ञानादेः समवायेन अभावमादाय रूपत्वादेरवच्छेदकत्वापत्तिवारणाय निवेशनीयतया प्रकृते द्रव्यत्वाधिकरणे विद्यमानः योऽभावः तदीयप्रतियोगितायां साध्यतावच्छेदकतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नानवच्छिन्नावच्छेदकत्वस्यैव अप्रसिद्धत्वात्. संयोगेन अवच्छेदकीभूतानां सर्वद्रव्याणामेव सखण्डत्वनियमात् किञ्चिद्रूपेणैव अवच्छेदकत्वात्। घटाद्यभावप्रतियोगितायां घटत्वादेरनवच्छिन्नावच्छेदकत्वसत्त्वेऽपि समवायसम्बन्धावच्छिन्नत्वस्यैव तत्र विध्यमानत्वेन संयोगम्बन्धावच्छिन्नत्वाभावात् इति चेत् - अस्मिन् पक्षे साध्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायां न निवेश्यम्।

न च तदनिविशे रूपवान् पृथिवीत्वादित्यत्र दोषः। विष्यतया रूपत्वविशिष्टज्ञानाद्यभावप्रतियोगितायां रूपत्वजातेः समवायातिरिक्तविष्यतासम्बन्धेनैव अवच्छेदकताया वाच्यतया जातेः समवायेनैव स्वरूपतः अवच्छेदकत्वमिति नियमात्। विष्यतासम्बन्धेन रूपत्वत्वेनैव अवच्छेदकतया निरवच्छिन्नावच्छेदकत्वविरहेणैव अतिव्याप्तिवारणसम्भवेन अवच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशस्य व्यर्थत्वात्।

तथा च दण्डिमान् द्रव्यत्वादित्यत्र हेतुसमानाधिकरणाभावप्रतियोगितानिरूपितनिरवच्छिन्नावच्छेदकत्वं घटत्वादावेव प्रसिद्धम्। तच्छून्यत्वं दण्डस्येति अतिव्याप्तिसंगतिरिति केचिद्वदन्ति।

अन्ये तु हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं इत्यत्र अवच्छेदकभेदो न निवेश्यः। अपि तु साध्यतावच्छेदकघटकसम्बन्धावच्छिन्नावच्छेदकतानिरूपरितपर्याप्तिसम्बान्धावच्छिन्नावच्छेदकत्वाभावनिवेश्य तथा च न दोष इति वदन्ति।

महानसीयवह्न्यभावे एतदभावापेक्षया वैलक्षण्यमाह - महानसीयेति। महानसीयवह्निर्नास्तीति प्रतीतौ महानसीयत्ववह्नित्वयोः साक्षात् प्रतियोगिन्येव विशेषणतया भानात् महानसीयत्वान्तर्भावेनैव तादृशाभावप्रतियोगितावच्छेदकत्वपर्याप्तिः स्वीक्रियते। न तु उक्तस्थल इव वह्नित्वस्य अवच्छेदकत्वं, महानसीयत्वस्य तु वह्नित्वनिष्ठावच्छेदकतावच्छेदकत्वमिति स्वीक्रियत इति भावः।

यदि प्रतियोगिनि साक्षात् विशेषणस्यैव प्रतियोगितावच्छेदकत्वं तद्विशेषणविशेषणस्य तु तदवच्छेदतावच्छेदकत्वमेवेत्युच्यते तदा वह्निमान् धूमादित्यादौ अव्याप्तिं शंकते - अथेति -

वह्नित्वाद्यंश एवेति। एवकारेण वह्न्यंशे विशेषणतया भानव्यवच्छेदः। तस्याः तादृशप्रतीतेः। उक्तयुक्त्येति। प्रतियोगिविशेषणतया भासमान एव प्रतियोगितावच्छेदकतापर्याप्तिः भासते, तद्विशेषणे तु तदवच्छेदकतावच्छेदकत्वमेव न तु तदन्तर्भावेन प्रतियोगितावच्छेदकत्वपर्याप्तिः। प्रतियोगितावच्धिकरणस्य प्रतियोगितावच्छेदकत्वासम्भवादिति युक्त्येत्यर्थः।

वह्नित्वादावेवेति - उक्तप्रतीतौ प्रतियोग्यंशे वह्नित्वस्यैव साक्षात् विशेषणतया भानादिति भावः। दुर्घटमिति - महानसीयत्वस्य प्रतियोगितावच्छेदकतावच्छेदकत्वेऽपि प्रतियोगितावच्छेदकत्वाभावेन प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं शुद्धवह्नित्वमेवेति साध्यतावच्छेदकीभूततादृशवह्नित्वे अनवच्छेदकत्वासत्त्वेन अव्याप्तिरिति भावः।

अत्र च महानसीयत्वविशिष्टवह्नित्वान्नास्तीत्यादिप्रतीतिविषयाभावप्रतियोगितायां वह्नित्वादेः समवायेन साक्षादवच्छेदकत्वं वह्नित्वविशेषणतापन्नमहानसीयत्वादेः सामानाधिकरण्यसम्बन्धेन तादृशप्रतियोगितावच्छेदकतावच्छेदकत्वमिति स्वीकारे गौरवरूपबाधकात् सामानाधिकरण्यसम्बन्धेन महानसीयत्वसहितवह्नित्वस्य निरुक्तप्रतियोगितायां साक्षादेवावच्छेदकत्वं न तु वह्नित्वस्य साक्षात्, महानसीयत्वस्य वह्नित्वनिष्ठावच्छेदकतायां अवच्छेदकत्वम्।

तथा च धूमसमानाधिकरणनिरुक्ताभावमादायापि वह्नित्वादावनवच्चेदकत्वं न दुर्घटमिति शंकते - यदिचेति। प्रतियोगितायामिति। हेतुसमानादिकरणाभावप्रतियोगितायामित्यर्थः। तदवच्छेदकतायामिति। प्रतियोगितावच्छेदकतायामित्यर्थः। गौरवादिति - अनेकत्र अनवच्छेदकत्वस्वीकारादिति भावः। एतदपेक्षया उक्तप्रतियोगितायां वह्नित्वमहानसीयत्वयोः व्यासज्यवृत्त्येकावच्छेदकत्वस्वीकारे

लाघवम्।

न च पूर्वमतेऽपि एवं सम्भवति महानसीयत्वे प्रतियोगितावच्छेदकतावच्छेदकत्वस्यैव उपगमेन प्रतियोगितावच्छेदकत्वस्य वह्नित्वमात्रपर्याप्तत्वात्। अनेकवृत्त्यनेकावच्छेदकत्वापेक्षया अनेकवृत्त्येकावच्छेदकत्वाङ्गीकारे

लाघवस्य स्फुटत्वात्।

नन्वत्रापि - वह्नित्वमहानसीयत्वनिष्ठावच्छेदकतयोः अवच्छेदकसम्बन्धभेदेन अवच्छिन्नत्वनिरवच्छिन्नत्वाभ्यां च भेदस्य अक्षततया कथमेतदिति चेत्, तदभावीयप्रतियोगितावच्छेदकतात्वेन व्यासज्यवृत्तित्वाभ्युपगमेन सामान्यरूपेण एकीकारसम्भवात्।

पूर्वमते च प्रतियोगितावच्छेदकत्वस्य प्रतियोगितावच्छेदकतावच्छेदकत्वस्य च साधारणम् एकं अवच्छेदकतात्वं दुर्वचम्। एकं साक्षादवच्छेदकं, अन्यत्तु परम्पराया। न च साक्षात्परम्परासाधारणम् एकावच्छेदकतात्वं सम्भवति, येन तेन रूपेण व्यासज्यवृत्तित्वं भवेत्। तथा च तन्मते नानावच्छेदकत्वनिबन्धनगौरवं दुर्वारमेव।

किञ्च एतन्मते वह्नित्वनिष्ठावच्छेदकतायाः निरवच्छिन्नत्वं महानसीय--निष्ठायाः परं महानसीयत्वत्वावच्छिन्नत्वम्।

पूर्वमते तु वह्नित्वनिष्ठावच्छेदकतायाः वह्नित्वस्य उक्तप्रतीतौ विशेष्यतया भानात् वह्नित्वत्वमहानसीयत्वोभयावच्छिन्नत्वं स्वीकार्यम्। महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकत्वस्य महानसीयत्वत्वावच्छिन्नत्वं च स्वीकरणीयम्। वह्नित्वस्य साक्षात्सम्बन्धेन अवच्छेदकत्वं, महानसीयत्वस्य तु

सामानाधिकरण्यरूपरम्परासम्बन्धेन अवच्छेदकत्वं इति च गौरवादिति भावः।

ननु सर्वं प्रतीत्यैव हि व्यवस्थाप्यम्। उक्तप्रतीतिस्तु णहानसीयत्ववह्नित्वयोः पूर्वोक्तविलक्षणावच्छेदकत्वमेव अवगाहत इति तद्विरोधेन पूर्वोक्तलाघवमकिञ्चित्करमित्याशंकायामाह - उक्तप्रतीतिस्त्विति - सामानाधिकरण्यसम्बन्धेन महानसीयत्वविशिष्टवह्नित्ववान्नास्तीति प्रतीतिरित्यर्थः। कम्बुग्रीवादिमान्नास्तीति प्रतीतिवदिति।

यथा वा तादृशप्रतीत्या कम्बुग्रीवादिमत्वरूपगुरुधर्मे प्रतियोगितावच्छेदकत्वावगाहनेऽपि सम्भवति लघौ गुरौ तदभावात् इति न्यायेन तादृशधर्मे अवच्छेदकत्वाभावेन अवच्छेदकत्वंशे तादृशप्रतीतेः भ्रमत्वमिष्यते तथात्रापि प्रतियोगितावच्छेदकत्वांशे निरुक्तप्रतीतिः भ्रमरूपैव न च ततोऽर्थसिद्धिरिति भावः।

समाधत्ते - तदेति - सामानाधिकरण्यसम्बन्धेन महानसीयत्वविशिष्टवह्नित्ववद्वान् धूमादित्यत्र उक्तयुक्त्या हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायाः महानसीयत्ववह्नित्वोभयपर्याप्ततया प्रकृतसाध्यतावच्छेदकीभूतवह्नित्वे अनवच्छेदकत्वस्य सुघटतया अतिव्याप्तिरित्यर्थः।

तथा च उक्तातिव्याप्तिवारणाय गुरुधर्मसाधारणं पारिभाषिकं प्रतियोगितावच्छेदकत्वमेव निवेशनीयम्।

तच्च स्वविशिष्यसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदककत्वम्।

तथा च अत्र लक्षणे स्वपदस्य यादृशधर्मस्य विशिष्टस्य अविशिष्टस्य वा अवच्छेदकत्वमभिमतं तादृशधर्मपरतया तादृशत्वरूपं पारिभाषिकम् अवच्छेदकत्वं भवति।

एवं च वह्निमान् धूमादित्यत्र हेतुसमानाधिकरणाभावत्वेन महानसीयत्वविशिष्टवह्नित्ववान्नास्तीति प्रतीतिविषयाभावोपादानेऽपि तत्र लाघवानुरोधेन स्वरूपसम्बन्धरूपावच्छेदकत्वस्य विशिष्टवह्नित्वेऽसत्त्वेऽपि पारिभाषिकावच्छेदकत्वं सम्भवत्येव।

तथा हि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणमहानसीयत्वसहितवह्नित्वस्य सामानाधिकरण्यसम्बन्धेन महनसीयत्वविशिष्टवह्निव्यापकतावच्छेदकत्वात् तत्कत्वरूपं अवच्छेदकत्वं विशिष्टवह्नित्वे अक्षतमेव।

परन्तु अनवच्छेदकमित्यस्य अवच्छेदकं यादृशं स्वं तद्भिन्नत्वमित्यर्थे प्रकृते शुद्धवह्नित्वे

विशिष्टवह्नित्वभेदस्य विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन दुर्घटतयाऽव्याप्तिः स्यादिति अवच्छेदकं यादृशं स्वं तादृशाविषयकप्रतीतिविषयत्वमेव विवक्षणीयम्। तथा च तस्य वह्नित्वमात्रविषयकप्रतीतिमादाय वह्नित्वे सुघटतया नाव्याप्तिः।

सामानाधिकरण्यसम्बन्धेन महानसीयत्वविशिष्टवह्नित्वसाध्यतावच्छेदककस्थले च

हेतुसमानाधिकरणाभावः महानसीयत्वविशिष्टवह्नित्ववदभावः तत्प्रतियोगितावच्छेदकीभूतमहानसीयत्ववह्नित्वे स्वपदार्थमहानसीयत्वविशिष्टवह्नित्वावच्छिन्नव्यापकतावच्छेदकत्वसत्त्वेन
पारिभाषिकावच्छेदकीभूततादृशविशिष्टवह्नित्वाविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकीभूततादृशविशिष्टवह्नित्वे

दुर्घटतया नातिव्याप्तिरिति वक्तव्यम्।

एवं सति दण्डिमान् दण्डिसंयोगादित्यत्रापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायाः पारिभाषिक्याः तत्त्वविशिष्टदण्ड एव

सत्त्वात् तदविषयकप्रतीतिविषयत्वस्य दण्डत्वविशिष्टे सुलभत्वेन दण्डत्वस्य व्यापकतावच्छेदकत्वानुसरणम् अनावश्यकमित्याह - तथा च सतीति। सखण्डस्येति - पारिभाषिकावच्छेदकलक्षणे स्वपदस्य अवच्छेदकत्वेन अभिमतधर्मपरतया विशिष्टस्य अवच्छेदकत्वे विशिष्टपरतया प्रकृते च दण्डस्य शुद्धस्य जात्यखण्डोपाध्यतिरिक्तस्य किञ्चिद्रूपेणैव प्रतियोगितात्वविशेषणतया भानात् तत्त्वविशिष्टस्यैव अवच्छेदकत्वस्य वाच्यतया स्वपदेन विशिष्टस्यैव ग्रहणमिति भावः।

अवच्छेदकलक्षणस्थेति - स्वविशिष्टेत्यादिपारिभाषिकावच्छेदकलक्षणस्थेत्यर्थः। तद्विशिष्टाविषयकेति - तत्तादिविशिष्टदण्डाविषयकेत्यर्थः। तादृशी च प्रतीतिः दण्डः इत्याद्याकारिका।

पारिभाषिकावच्छेदकत्वस्येति - स्वपदस्य तत्तद्व्यक्तिमात्रपरतया तादृशयत्किञ्चित्पदार्थभेदनिवेशे व्यभिचारिणि अतिव्याप्त्यापत्त्या तादृशं यद्य-- तत्तद्भेदकूटस्य तत्त्वाभावकूटस्य वा निवेशनीयतया असर्वज्ञस्य तद्ज्ञानासम्भवेन पारिभाषिकावच्छेदकत्वं न विवक्षणीयम्। किन्तु स्वरूपसम्बन्धरूपावच्छेदकत्वमेव। तस्य गुरुधर्मसाधारण्यमेष्टव्यमिति। तावतैव महानसीयत्वविशिष्टवह्नित्वावच्छिन्नसाध्यकव्यभिचारिणि साध्यतावच्छेदके हेतुसमानादिकरणाभावप्रतियोगितावच्छेदकत्वस्यैव सत्त्वेनानतिप्रसङ्गादिति भावः।

वह्निमान् धूमादित्यादौ पूर्वोक्तरीत्याप्रसक्तामव्याप्तिं परिहर्तुमाह - एवं चेति। स्वरूपसम्बन्धरूपावच्छेदकत्वस्य गुरुधर्मसाधारण्य इत्यर्थः। शुद्धसमवायेन वह्नित्वादेरिति - प्रतियोगितावच्छेदकत्वादिति भावः।

ननु उक्तविशेषरूपेण सम्बन्धत्वानुपगमेऽपि शुद्धसमवायस्यैव प्रतियोगितावच्छेदकताघटकसम्बन्धत्वेऽपि विशिष्टवह्नित्वादेः प्रतियोगितानतिप्रसक्तत्वं न सम्भवति। तथाहि प्रतियोगितानतिप्रसक्तत्वं न प्रतियोगिताशून्यावृत्तित्वम्। येन वह्नित्वस्य

अतिप्रसक्तताया विशिष्टवह्नित्वे अनतिप्रसक्तत्वं दुर्घटं स्यात्। किन्तु स्वव्यापकप्रतियोगिताकत्वम्।

तथा चात्र स्वपदेन विशिष्टवह्नित्वमादाय तद्व्यापकप्रतियोगिताकत्वस्य सूपपादत्वात् इत्यतो युक्त्यन्तरमाह - शुद्धसमवायादेरिति - तत्र - ----------प्रतियोगितायाम्। महनसीयत्वादीति सामानाधिकरण्यसम्बन्धेन
महानसीयत्वोपलक्षितवह्नित्वावच्छिन्नाभावात्

महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्नाभावस्य वैलक्षण्यमावश्यकम्। अभावयोः वैलक्षण्यं हि प्रतियोगितावच्छेदकसम्बन्धभेदात् धर्मिभेदाद्वा भवति।

यथा घटत्वावच्छिन्नाभावपटत्वावच्छिन्नाभावयोः संयोगेन घटाभावसमवायावच्छिन्नघटाभावयोश्च। प्रकृते च उभयत्र महानसीयविशिष्टवह्नित्वस्यैव प्रतियोगितावच्छेदकधर्मत्वात्। शुद्धसमवायस्यैव प्रतियोगितावच्छेदकताघटकसम्बन्धत्वे च सम्बन्धभेदस्याप्यभावेन उभयाभावयोः वैलक्षण्यनिर्वाहात्। विशिष्टनिरूपितसमवायस्यैव विशिष्टधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकताघटकसम्बन्धत्वमुपेतम्। उपलक्षितधर्मावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकताघटकसम्बन्धत्वं शुद्धसमवाय्सेयति वैलक्षण्यं निर्वाह्यम् इति भावः।

नन्वेतावता उक्ताव्याप्तेः कः परिहार इति चेदाह - तथाचेति । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं निवेशनीयम्। अन्यथा रूपवान् पृथिवीत्वात् इत्यत्र पृथिवीधिकरणघटादौ विषयितासम्बन्धेन रूपत्वविशिष्टज्ञानस्य समवायेन अभावमादाय अव्याप्त्यापत्तेः।

तथा च प्रकृते धूमसमानाधिकरणः न महानसीयत्वोपलक्षितवह्नित्वावच्छिन्नाभावः अपि तु महानसीयत्वविशिष्टवह्नित्वावच्छिन्नाभावः। तत्प्रतियोगितावच्छेदकता च उक्तयुक्त्या विशिष्टनिरूपरितसमवायसम्बन्धावच्छिन्ना, न तु प्रकृतसाध्यतावच्छेदकताघटकीभूतशुद्धसमवायसम्बन्धावच्छिन्नेति। तादृशसम्बन्धेन हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं घटत्वादिकमेवेति अनवच्छेदकत्वं वह्नित्वेऽक्षतमेवेति भावः।

ननु अभावप्रतियोगितावच्छेदकांशे यस्य उपलक्षणतया भानं तस्य न प्रतियोगितावच्छेदकतावच्छेदकत्वम्। यस्य विशेषणतया भानं तस्य प्रतियोगितावच्छेदकतावच्छेदकत्वम् इत्यत एव पूर्वोक्ताभावयोः वैलक्षण्यसिद्धौ विशिष्टसम्बन्धावच्छिन्नावच्छेदकताकत्वशुद्धसम्बन्धावच्छिन्नावच्छेदकताकत्वयोः अभावभेदकत्वमनुचितम्।

न च विनिगमकाभावः - उभयत्र उभयोः धर्मयोः अवच्छेदकत्वं स्वीकृत्य सम्बन्धभेदानुसरणापेक्षया अवच्छेदकभेदाधीनभेदकल्पने लाघवात्। विशेषरूपेण सम्बन्धत्वानुपगमाच्च इत्यभिप्रायेण शंकते - न चेति। तस्येति। महानसीयत्वसामानाधिकरण्यस्येत्यर्थः। अवच्छेदककोटौ न प्रवेश इति।

अवच्छेदकतावच्छेदकत्वं नेत्यर्थः। तत्प्रवेश इति। अवच्छेदकतावच्छेदकत्वमित्यर्थः। अभावप्रतियोगितावच्छेदकांशे प्रकारतया भासमानस्य तादृशप्रतियोगितावच्छेदकतावच्छेदकत्वमावश्यकम्। उक्तस्थले उपलक्षणीभूतमहानसीयत्वसामानाधिकरण्यस्य च वह्नित्वांशे प्रकारतया भानमेष्टव्यम्। अन्यथा

तादृशाभावविष्यकबुद्धेः नह्निर्नास्तीत्याकरकताप्रसङ्गात्। अवच्छेदककोट्यप्रविष्टस्य न भानमिति सिद्धान्तात् इत्याशयेन समाधते - उपलक्षणीभवदिति। भानादिति। उपलक्षणस्याभावे तादृशाभावबुद्धिः महानसीयत्वोपलक्षितवह्नित्वावान्नास्तीत्याकारिका न स्यात्। अपि तु वह्निर्नास्तीत्याकारिकैवेतिभावः। उपलक्षितधर्मावच्छिन्नाभावविशिष्टधर्मावच्छिन्नाभावयोः अवच्छेदकतावच्छेदकसम्बन्धभेदेन भेदसिद्धावपि उपलक्षणविधया अवच्छेदकत्वं, विशेषणविधया अवच्छेदकत्वं च किंरूपमित्याशंकां तयोः स्वरूपनिर्वचनेन निराकुर्वन् तेनैव अभावद्वयभेदं चाह - यदुपलक्षितेति - यदाश्रयप्रतियोगिकेत्यर्थः। तस्य उपलक्षणतया अवच्छेदकत्वमिति। तत्त्वम् - उपलक्षणतया अवच्छेदकत्वमित्यर्थः। अवच्छेदकत्वमिति। तत्त्वं विशेषणविधया अवच्छेदकतामत्यथः। तस्य उपलक्षणतया अवच्छेदकत्वं नाम अभावप्रतियोगितावच्छेदकताघटकसंसर्गप्रतियोगितावनवच्छेदकत्वे सति तत्समानाधिकरणत्वम्। विशेषणविधया अवच्छेदकत्वं नाम अभावप्रतियोगितावच्छेदकताघटकसंसर्गप्रतियोगितावच्छेदकत्वे सति तत्समानाधिकरणत्वमिति पर्यवसितम्। विशेषत्वादिति - अभावद्वयभेदकत्वादित्यर्थः।

ननु विशिष्टधर्मावच्छिन्नाभावस्य विशिष्टनिरूपितसम्बन्धे प्रतियोगितावच्छेदकताघटकसम्बन्धत्वस्वीकारे तुल्यन्येन विशिष्टाभावेऽपि विशिष्टनिरूपितसम्बन्धस्यैव प्रतियोगितावच्छेदकसम्बन्धत्वापत्तिः। यदुपलक्षितेत्यादिपूर्वनिरुक्तरीत्या यद्विशिष्टनिरूपितसमवायादेः प्रतियोगितावच्छेदकसम्बन्धत्वं तस्य विशेषणविधया अभावप्रतियोगितावच्छेदकत्वम्, यदुपलक्षितनिरूपितसमवायादेः तथात्वं तस्.य उपलक्षणविधया अभावप्रतियोगितावच्छेदकत्वम् इत्यत एव विशिष्टाभावोपलक्षिताभावयोः भेदसिद्धेः। न च अस्त्वेवमेवेति वाच्यम्।

तथा सति प्रतियोग्यसामानाधिकरण्यशरीरे दीधितिकृतां प्रतियोगितावच्छेदकावच्छिन्नत्वपर्यन्तनिवेशव्यावृत्त्यसङ्गतिः।

विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताभावस्य प्रतियोगितावच्छेदकीभूतविशिष्टनिरूपरितसमवायसम्बन्धेन सत्तारूपप्रतियोग्यसमानाधिकरणताया प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशेनैव दोषवारणसम्भवादित्याशंक्य विशिष्टनिरूपितसमवायादेः प्रतियोगितावच्छेदकतावच्छेदकत्वसम्बन्धत्वसम्भवेऽपि तस्य न प्रतियोगितावच्छेदकसम्बन्धत्वं सम्भवतीति शुद्धसमवायस्यैव प्रतियोगितावच्छेदकत्वं स्वीकार्यम्। तथा च दीधितिकृदुक्तव्यावृत्तिसंगतिरित्याह - एवं चेति। एकत्वेति। एकत्वप्रागभावविशिष्टघटः

संयोगेन नास्तीति प्रतीतिसिद्धाभावस्य प्रतियोगितावच्छेदकसम्बन्धत्वं विशिष्टनिरूपरितसंयोगस्य न सम्भवति। उत्पन्नं द्रव्यं क्षणमगुणम् अक्रियं च तिष्ठति इति न्यायेन आद्यलक्षणावच्छिन्नघटप्रतियोगिकसंयोगस्यैव अप्रसिद्धतया विशिष्टाभावोपलक्षिताबावप्रतियोगितावच्छेदकतयोः उक्तरीत्या वैलक्षण्यस्यदुर्वचत्वादिति भावः।

अन्यथैवेति - प्रतियोगितायाः व्यासज्यवृत्तित्वं स्वीकृत्यैवेत्यर्थः। विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्याप्ता। उपलक्षिताभावप्रतियोगिता तु विशेष्य एव पर्याप्तेत्यभावद्वयभेद इत्यर्थः।

शुद्धसमवायादेरेवेति - क्वचिद्विशिष्टनिरूपितसम्बन्धाप्रसिद्ध्या अभावद्वयवैलक्षण्याय प्रकारान्तरानुसरणस्य आवश्यकत्वे अन्त्रापि तथैव वैलक्षण्याभ्युपगमस्यैव न्याय्यतया शुद्धसमवायस्यैव विशिष्टसत्ताभावप्रतियोगितावच्छेदकसम्बन्धतया प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशेऽपि विशिष्टसत्तावान् जातेरित्यत्रविशिष्टसत्ताभावस्य प्रतियोगितावच्छेदकशुद्धसमवायसम्बन्धेन सत्तारूपप्रतियोगिसमानाधिकरणतया अभावान्तरमादाय तत्रातिव्याप्तिः स्यादिति तद्वारणाय अग्रे दीधितिकृतां प्रतियोगितावच्छेदकविशिष्टासमानाधिकरणपर्यन्तनिवेशव्यावृत्तिसंगतिरिति भावः।

विशेषरूपेण संसर्गत्वानपगने उक्तरीत्या वैलक्षण्योपपादनासम्भवात् आह - मा भूद्वेति। विशिष्टनिरूपितेति।

महानसीयत्वसामानाधिकरण्यविशिष्टेत्यर्थः।

आद्येति - महानसीयत्वसामानाधिकरण्योपलक्षितवह्नित्वादिनिष्ठा। तद्धर्मावच्छेन्नेति। उपलक्षणीभूतमहानसीयत्वसामानाधिकरण्यावच्छिन्नेत्यर्थः। विशेष्यपर्याप्तेति - वह्नित्वादिपरूपविशेष्यपर्याप्तेत्यर्थः। अन्त्या चेति - महानसीयत्वसामानाधिकरण्यविशिष्टवह्नित्वादिनिष्ठा चेत्यर्थः। तथा च द्विविधाभावयोरपि विलक्षणावच्छेदकताकत्वादेववैलण्यं सम्पाद्यम्। न तु सम्बन्धभेदेनेति भावः।

अत्र च महानसीयत्वविशिष्टवह्नित्ववान्नास्तीति प्रतीतिविषयाभावस्य महानसीयवह्निर्नास्तीति प्रतीतिविषयाभावापेक्षया वैलक्षण्याय - प्रथमे महानसीयत्ववह्नित्वोभयधर्मे प्रतियोगितावच्छेदकतापर्याप्त्या सह महानसीयत्वे प्रतियोगितावच्छेदकतावच्चेदकत्वमिपि स्वीकार्यम्। द्वितीये च महानसीयत्ववह्नित्वयोः प्रतियोगितावच्छेदकतापर्याप्तिमात्रम्। न तु महानसीयत्वे अवच्छेदकतावच्छेदकत्वमपीति बोध्यम्।

अस्मिन् पक्षे वह्निमान् धूमादित्यादौ वह्नित्वादेरनवच्चेदकत्वं घटयति - तावतापीति। अखण्डस्येति - धर्मान्तराविशेषितस्येत्येर्थः। धर्मान्तरेति - महानसीयत्वसामानाधिकरण्येत्यर्थः। धूमादिमत्यवृत्तेरिति। तथा च धूमसमानादिकरणाभाव इत्यनेनतादृशाभावस्य ग्रहणासम्भवात् तदीयप्रतियोगितावच्छेदकत्वस्य साद्यतावच्छेदकीभूतशुद्धवह्नित्वपर्याप्तेत्वेऽपि न क्षतिरिति भावः। महानसीयत्वादिसामानाधिकरण्यविशिष्टवह्नित्वावच्छिन्नाभावस्य धूमसमानाधिकरणत्वेऽपि तत्प्रतियोगितावच्छेदकतायाः

महानसीयत्ववह्नित्वोभयपर्याप्ततया तादृशपर्याप्त्यनधिकरणत्वं

शुद्धवह्नित्वस्य अक्षतमिति नाव्याप्तिरिति भावः।

दण्डिमान् दण्डिसंयोगादित्यत्र दण्डस्य व्यापकातवच्छेदकत्वासम्भवं घटयति - तत्त्वोपलक्षितेति। अत्र दण्डिसंयोगरूपहेत्वधिकरणे भूतलान्तरे तत्त्वोपलक्षितदण्डवतः एतद्भूतलवर्तिनः पुरुषस्य अभावोऽपि सम्भवति। तत्प्रतियोगितावच्छेदकता च उक्तरीत्या

तत्त्वावच्छिन्ना शुद्धदण्ड एव पर्याप्ता साध्यतावच्छेदकतावच्छेदकीभूतशुद्धसंयोगसम्बन्धावच्चिन्ना चेति। दण्डादिरूपसाध्यतावच्छेदकस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य दुर्गटतया दण्डत्वादेः व्यापकतावच्छेदकत्वानुसरणं दीधितिकृतां आवश्यकमित्याशयः।

साध्यादिभेदे व्याप्तेर्भेदात् दण्ड्यादिसाद्यकस्थले अन्यादृशव्याप्तिविवक्षया सामाञ्जस्यात् दीधितिकृतां किमर्थोऽयं प्रयास इत्याशंकायामाह - एतच्चेति। दण्डत्वादेः व्यापकत्वावच्छेदकत्वानुसरणं चेत्यर्थः। सर्वत्र एकशब्देनैव व्याप्तिप्रदर्शनार्थम्. एकोक्त्यनादरेत्विति - शब्दैक्यस्य अकिञ्चित्करत्वादिति भावः। अनुगतरूपेणेति। दण्डत्वाद्यनुगतरूपावच्छिन्ननानाव्यक्तिविधेयतावच्छेदककानुमितावित्यर्थः।

यद्रूपावच्छिन्नं हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं, यद्रूपं वा हेतुसमानादिकरणाभावप्रतियोगितावच्छेदकतानवच्छेदकं तद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यं तद्रूपविशिष्टवच्छिन्ननिरूपिता व्याप्तिः इति रीत्या निर्वचनीयेत्यर्थः।

दण्डिमानित्यत्र दण्डिसंयोगरूपहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायाः तत्त्वविशिष्टदण्डपर्याप्ततया दण्डत्वविशिष्टे अनवच्छेदकत्वसत्त्वेन प्रथमव्याप्तेः, दण्डत्वरूपसाध्यातावच्छेदकस्य हेतुसमानाधिकरणाभावप्परतियोगितावच्छेदतानवच्छेदकताय च, द्वितीव्याप्तेः अक्षतत्वादिति भावः।

अत्र प्रथमपक्षे एकमात्रपर्याप्तावच्छेदकत्वं नाव्याप्यवृत्तीति तत्त्वविशिष्टदण्डपर्याप्तावच्छेदकत्वस्य दण्डत्वावच्चेदेन अभावो नोपपद्यत इति यद्युच्येत तदा द्वितीयपक्षावलम्बनमिति बोध्यम्।

This is from the page in original 50

अनयोः कल्पयोः अन्यदपि स्वारस्यामस्तीत्याह तथा सतीति। विशेषदर्शिनामपीति। दण्डस्य व्यापकतावच्छेदकत्वं न सम्भवति इति ज्ञानवतामपीत्यर्थः । निर्वहतीति - दण्डत्वाद्यनुगतधर्मावच्छिन्नदण्डादिनिष्ठविधेयतावच्छेदकताकानुमितित्वावच्छिन्नं प्रति दण्डत्वविशिष्टे व्यापकतावच्छेदकत्वावगाहिव्याप्तिज्ञानस्य, दण्डत्वे व्यापकतावच्छेदकतावच्छेदकत्वावगाहिव्याप्तिज्ञानस्य वा कारणतया अभ्रान्तानामपि उक्तविधव्याप्तिज्ञानात् दण्डिमानयं इत्याकारकानुमितिः निर्वहति। तद्धर्मविशिष्टस्य विधेयतावच्छेदकतया

भानं प्रति तादृशविशिष्टस्य व्यापकतावच्छेदकत्वेन भानं प्रयोजनम् । तद्धर्मस्य विधेयतावच्छेदकतावच्छेदकतया भानं प्रति च तस्य व्यापकतावच्छेदकतावच्छेदकत्वेन भानं प्रयोजकमिति उपगमादिति भावः।

पूर्वं तु दण्डादौ व्यापकतावच्छेदकत्वभ्रमादेव दण्डिमानित्याकारिकानुमितिः निर्वाह्या इति भावः। यद्यपि पूर्वमपि स्वाश्रयघटितपरम्परासम्बन्धेन यत्र धर्मे व्यापकतावच्छेदकत्वग्रहः इत्यादिग्रन्थेन विशेषदर्शिनामपि दण्डिमानित्याकारकानुमिति निर्वाहप्रकारः प्रदर्शितः। तथापि एकरूपव्याप्तावेव परम्परासम्बन्धस्थले विलक्षणकार्यकारणभावकल्पनेन तादृशानुमित्युपपादनं कृतम्। अत्र तु एतादृशस्थले अन्यादृशव्याप्तेरैव स्वीकृततया न नानाविधकारणत्वमिति भावः।

पूर्वं तु दण्डादौ व्यापकतावच्छेदकत्वभ्रमादेव दण्डिमानित्याकारिकानुमितिः निर्वाह्या इति भावः । यद्यपि पूर्वमपि स्वाश्रयघटितपरम्परासम्बन्धेन यत्र धर्मे व्यापकतावच्छेदकत्वग्रहः इत्यादिग्रन्थेन विशेषदर्शिनामपि दण्डिमानित्याकारकानुमितिनिर्वाहप्रकारः प्रदर्शितः। तथापि एकरूपव्याप्तावेव परम्परासम्बन्धस्थले विलक्षणकार्यकारणभावकल्पनेन तादृशानुमित्युपपादनं कृतम्। अत्र तु

एतादृशस्थले अन्यादृशव्याप्तेरेव स्वीकृततया न नानाविधकारणत्वमिति भावः।

दीधितिकृता स्वयंवक्ष्यमाणप्रतियोगितार्धर्मिकोभयाभावघटितव्याप्तेः उक्तप्रयासं विनैव दण्ड्यादिसाध्यकस्थले समन्वयो भवतीत्याह - एवमिति। स्वयमिति। सार्वभौमाद्यपरिशीलितत्वज्ञापनार्थम्। हेतुसमानाधिकरणेति। दण्डिसंयोगरूपहेतुसमानाधिकरणतत्तदृण्डच्यभावप्रतियोगितायां यद्धर्मपदार्थसाध्यतावच्छेदकीभूतदण्डत्वविशिष्टदण्डावच्छेद्यत्वाभावः अव्याहतः। तस्याः तत्त्वविशिष्टदण्डावच्छेद्यत्वात् । तथा च निरूक्तभावप्रयुक्तोभयाभावस्य उक्तप्रतियोगितायां सत्वात्। तद्धर्मभूतदण्डत्वावच्छिन्नसामानाधिकरण्यं दण्डिसंयोगेऽस्तीति समन्वयः इति भावः।

ननु तद्दण्ड्यभावप्रतियोगितायामपि दण्डावच्छेद्यत्वसत्वात् कथं दण्डरूपसाध्यतावच्छेदकावच्छेद्यत्वाभाव इत्याशङ्कायामाहदण्डच्यादीति।

यद्धर्मपदेन यत्र यादृशं साध्यतावच्छेदकं विशिष्टं अविशिष्टं वा तस्यैव ग्राह्यतया प्रकृते

दण्डत्वविशिष्टस्यैव यत्पदार्थतया तत्त्वविशिष्टदण्डनिरूपितावच्छेद्यताशालिन्यां हेतुसमानाधिकरणाभावप्रतियोगितायां दण्डत्वविशिष्टदण्डनिरूपितावच्छेद्यत्वाभावः अक्षतः। तादृशावच्छेद्यत्वं च दण्डी नास्तीति प्रतीतिसिद्धाभावप्रतियोगितायामेवास्ति इति भावः। विलक्षणेति - तद्दण्ड्यभावप्रतियोगितावच्छेदकत्वं तत्त्वावच्छिन्नं ततोऽस्य वैलक्षण्यं दण्डत्वावच्छिन्नत्वादिरूपं बोध्यम्।

विशिष्टहेतुकस्थले विशिष्टवैशिष्ट्यज्ञानं अनुमितिजनकम्। तत्र आद्ये व्याप्तिघटकव्यापकतायां विशिष्टहेतुसामानाधिकरण्यस्य निवेशः । अन्त्ये च उपलक्षितहेतुसामानाधिकरण्यस्यैवेति व्यवस्थासिद्ध्यर्थमाहहेतुतेति। साधारणं रूपं हेतुनिष्टनिरूपकताकसामानाधिकरण्यत्वम्।

विशिष्टसामानाधिकरण्यत्वेनेति - हेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वत्वेनेत्यर्थः। नाव्याप्तिरिति दीधितिग्रन्थस्य न व्याप्त्यभाव इत्येतावन्मात्रार्थकत्वे पूर्वोक्तव्यवस्थाया उलाभात् व्याचष्टे न विशिष्टसत्तात्वेति- विशिष्टहेतौ नाव्याप्तिरित्यस्य अयमभिप्रायः। विशिष्टहेतौ यादृशी व्याप्तिरपेक्षिता तस्या अनिर्वाहो नेत्येवार्थ भवति। तदर्थश्च विशिष्टहेतुमताज्ञानाद्यानुमितिर्भवेत् तादृशानुमित्यौपयिकव्याप्त्यनिर्वाहो नेति पर्यवस्यतीति। एवंव्याख्यानस्य प्रयोजनमाहतेनेति विशिष्टोपलक्षितहेत्वोः व्याप्ति भेदेन विशिष्टहेतुकव्याप्तौ विशिष्टसामानाधिकरण्यनिवेशे प्रदर्शिते तुल्यन्यायात् उपलक्षितहेतुकव्याप्तौ उपलक्षितहेतुसामानाधिकरण्यमेव नेविष्टमिति ज्ञायते इत्याह - तेनेति - विशिष्टहेतौ उपलक्षितहेतौ वा व्याप्तिः। हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यगर्भा एकरूपेति यथाश्रुतार्थे बाधकमाह - अत इति।

तादृशहेतुसामानाधिकरण्येति - विशिष्टसत्तात्वोपलक्षितेत्यर्थः। इदमग्रिमव्याप्त्यभावे हेतुः । वस्तुतः उपलक्षितहेतुकस्थले उपलक्षितहेतुव्यापकत्वघटितसाध्यसामानाधिकरण्यस्यैव व्याप्तितया उपलक्षितसत्तायाः गृणवृत्तितया गुणरूपपक्षे तादृशीहेतुमत्ताज्ञानस्य प्रमात्वात्। ततो गुणरूपपक्षे

द्रव्यत्वानुमितिः स्यात्। न चेष्टापत्तिः। सल्लिंगकपरामर्शस्य भ्रमानुमित्यजनकतवादिति भावः।

यद्यपि पक्षे हेतुमत्ताज्ञानमात्रं नानुमितिकारणं, किन्तु स्वव्यापकसाध्यसामानाधिकरण्य विशिष्टतद्वत्ताज्ञानमेव । तथा च कथमेतदुक्तिरिति शङ्का भवति। तथापि विशिष्टसत्त्वोपलक्षितेतीदं व्यापकसामानाधिकरण्यस्यापि उपलक्षणमित्यदोषः।

तथा च विशिष्टसत्ताव्यापकद्रव्यत्वसमानाधिकरण विशिष्टसत्तात्वोपलक्षितसत्तावान् गुण इति ज्ञानस्य प्रमात्वात् उपलक्षितहेतुमत्ताज्ञानजन्यानुमित्यौपयिक व्याप्तावपि हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यगर्भव्याप्तेरेव स्वीकारे तादृशानुमित्यापत्तिः। अतः उपलक्षितहेतुकस्थले उपलक्षितहेतुव्यापकत्वघटितव्याप्त्यन्तरं स्वीकरणीयम् । तथा सति तादृशहेतुव्यापकत्वस्य द्रव्यत्वेऽभावात् । भ्रमंविना तादृशव्याज्ञानात् नानमित्यापत्तिरित्यर्थः।

उपलक्षितहेतुमत्ताज्ञानप्रदर्शनं तु व्यापकत्वशरीरे विशिष्टसत्तासामानाधिकरणयज्ञानवत् अत्र

विशिष्टसत्तावत्त्वज्ञानं यद्यपेक्ष्येत तदा तस्य भ्रमरूपतया उक्तापादनं न स्यादिति शङ्कानिराकरणाय।

ननु उपलक्षितहेतुसामानाधिकरण्यगर्भव्याप्त्यन्तरमेव मास्तु, तथा च गुणादौ उपलक्षितहेतुमत्ताज्ञानात् अनुमित्यापत्तेरपि नावकाशः। विशिष्टसामानाधिकरण्यगर्भव्याप्तेश्च विशिष्टपक्षधर्मतासहकारेणैव अनुमितिप्रयोजकत्वाङ्गीकारेण पूर्वोक्तोपलक्षितहेतुमत्ताज्ञानस्य अनुमितिजनकत्वाभावादिति शङ्कायामाह - यत्रेति।

उभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्येतिघटपटवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्येत्यर्थः। घटपटवृत्तिसंयोगस्य एकत्वेऽपि घटवृत्तित्वविशिष्टसंयोगस्य अधिकरणं घट एव। एवं पटवृत्तित्वविशिष्टस्य तस्यू अधिकरणं पट एवेति तादृशोभयवृत्तित्वविशिष्टसं योगाधिकरणं किमपि न भतीत्याशयः।

स्वीकरणीयमिति - स्वीकारे च घटपट वृत्तित्वोपलक्षितसंयोगव्यापकघटपटान्यतरत्वसमानाधिकरणतादृशसंयोगवद्घटपटान्यतरदिति ज्ञानात् तादृशयादित्यादाविति भावः। असमर्थः - उपमानस्य प्रमाणान्तरतवं निराकर्तु तत्स्थलीयप्रमितेरनुमानेनैव निर्वाहः परैराशंक्यते।

तथाहि गवयपदार्थं अजानतः पुंसः गोसदृशो मलय इति अतिदेशवाक्यार्थज्ञानरूपात् करणात् पुरोवर्तिपिण्डदर्शनानन्तरं गवयो गवयपदवाच्यू इत्याकारिका विलक्षणा प्रमितिरिति नैय्यायिकैरिष्यते - तन्न युक्तम् - गवयो गवयपदवाच्यः गोसादृश्यात् इत्यनुमानेनैव निर्वाहात् । कथमिति चेत् गोसदृशः गवयपदवाच्यइत्यारण्यकपुरूषवाक्यात् यो यो गोसदृशः स गवयपदवाच्यः इति व्याप्तिं गृहीत्वा पुरोवर्तिनि गोसादृश्यरूपं हेतुं पश्यति, अनन्तरं व्याप्तिस्मरणेन विशिष्टपरामर्शानन्तरं गवयपदवाच्यत्वानुमितिरिति अत्र सादृश्ये व्याप्तिज्ञानविरहदशायामपि गोसदृशो गवयं पदवाच्य इत्यतिदेशवाक्यार्थज्ञानान्तरं गवयत्वावच्छिन्ने गोसादृश्यज्ञानात् गोसादृश्यधर्मितावच्छेदककगवयपदवाच्यताज्ञानसहकृतात् गवयत्वावच्छिन्ने गवयपदवाच्यताज्ञानं

यत् जायते तत्र अनुमिति वासम्भवात् उपमित्याख्यप्रमित्यन्तरमेवेति सिद्धान्तः।

अत्र उभयमतेऽपि सादृश्यस्य व्याप्यत्वमनुमतमिति तदनुरोधेन उपलक्षितहेतुसामानाधिकरण्यघटितव्याप्त्यान्तरमेष्टव्यमिति। अन्यथा

अनुपपत्तिं घटयति तद्भेदेति। हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यघटितव्याप्तेरेव सर्वत्र गमकत्वे - अत्र तद्भेदसामानाधिकरण्यविशिष्टतद्वृत्तिधर्मत्वरूपसादृश्यत्वविशिष्टाधिकरणाप्रसिद्धिः। कृत इति चेत् - तद्वृत्तित्वतदन्यवृत्तित्वविशिष्टाधिकरणत्वस्य क्वाप्य सम्भवात् । तद्वृत्तिधर्ममात्रस्य सादृश्यरूपत्वे गवयपदवाच्यवाभीववति गवि व्यभिचारः अतः तद्भेदेत्यादि - तद्भेदसमानाधिकरणधितमात्रस्य तथात्वे घटादौ व्यभिचारः। न च तद्यापि द्रव्यत्वादिकमादायघटादौ व्यभिचार इति वाच्यम् ।

तथाविधभूयोधर्मस्यैव सादृश्यपदार्थत्वात् ।

नचैवमपि द्रव्यत्वप्रमेयत्ववाच्यत्वादिकमादाय घटादौ तद्दोष तादवस्थ्यमिति वाच्यम् ।

उपमानोपमेयभिन्नवृत्तिधर्मान्यत्वेननिरूक्तधर्मविशेषणेन अदोषात् ।

अत्र अग्रे हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वं विवक्षिष्यते येन सम्बन्धेन पक्षे हेतुमत्ताज्ञानं अनुमितिं जनयति स एव हेतुतावच्छेदकसम्बन्धः। द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वा दित्यत्र हेतुमत्ताज्ञानं विशिष्टवैशिष्ट्यावगाहिज्ञानरूपमेवा विशिष्टवैशिष्ट्यावगाहिज्ञाने च विशिष्टनिरूपितसमवायादिरेव विशेषणसम्बन्ध इत्येकं मतम् । शुद्धसमवायादिना विशेषणावगाहित्वे सति स्वविशिष्टनिरूपितसमवायादिरूपपरम्परासंबन्धेन हेतुतावच्छेदकीभूतवैशिष्ट्यरूपविशेषणतावच्छेदक वत्तावगाहीत्यपरंमतम्।

तत्र प्रथमे विशिष्टनिरूपितसमवायस्य हेतुतावच्छेदसम्बन्धत्वम् । द्वितीये च शुद्धसमवायस्य तथात्वम्। उपलक्षितवैशिष्ट्यावगाहिबुद्धौ च विशेषणस्य शुद्धसमवायादिना भानमात्रम् । उपलक्षणस्य तु परम्पराऽधिकरणे भानमिति अस्य ततो वैलक्षण्यम् । शुद्धसमवायेन सत्तायाः गुणवृत्तित्वेऽपि निरूक्तपरम्परासम्बन्धेन वैशिष्ट्यवत्त्वस्य गुणे बाधितत्वात्। गुणो विशिष्टसत्तावानिति ज्ञानस्य भ्रमत्वमपि निर्वहतीति न तदर्थं विशिष्टनिरूपितविलक्षणाधिकरणत्वमुपेयम्।

एवं चात्र प्रथमपक्षे हेतुतावच्छेदकवैशिष्टयानि वेशेऽपि उक्तस्थले हेतुतावच्छेदकीभूतविशिष्टनिरूपितसमवायसम्बन्धेन सत्ताधिकरणत्वस्य द्रव्य एव सत्त्वेन उक्तव्याप्तेः निर्वाहात् विशिष्टपदं व्यर्थमिति शङ्कते-अथेति। सम्बन्धतयेति विशेषणसम्बन्धतयेत्यर्थः। तेन सम्बन्धेनेति - विशिष्टनिरूपितसमवायसम्बन्धेनेत्यर्थः। तेन सम्बन्धेनेति - विशिष्टनिरूपितसमवायसम्बन्धेनेत्यर्थः। विशिष्टनिरूपितसमवायरूपहेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वघटितव्याप्तेः हेतुतावच्छेदकवैशिष्ट्यानिवेशेऽपि तादृशसम्बन्धेन सत्ताव्यापकत्वस्यापि द्रव्यत्वे अक्षततया तद्घटितव्याप्तिः विशिष्टसत्तारूपहेतौ अक्षतैवेति विशिष्टपदं व्यर्थमिमि भावः।

द्वितीय पक्षे विशिष्टपदसार्थक्यं शङ्कते - नचेति इदमिति। हेतुतावच्छेदकवैशिष्ट्यपदोपदानमित्यर्थः। उक्तस्थलेऽपीति - विशिष्टहेतुकस्थलेऽपीत्यर्थः। न प्रतीकार इति - न दोषवारणमित्यर्थः।

द्वितीयपक्षावलम्बने विशिष्टहेतौ व्याप्त्यन्तरमेव न स्वीकरणीयम्। गुणकर्मान्यत्ववैशिष्ट्यहेतुकानुमित्यनुरोधेन अवश्यकल्पनीयतादृशविशेषणनिष्ठव्याप्त्यैव विशिष्टहेतुकानुमितिनिर्वाहसम्भवात्। विशिष्टसत्तायाः तत्र तत्त द्रव्यत्वव्याप्यत्वमभ्युपगतं व्याहन्येत इति द्वितीयपक्षावलम्बनं अनुचितमित्यभिप्रायेण समाधत्ते हेतुतेति - हेतुतावच्छेदकविशिष्ट हेत्वधिकरणवृत्त्यत्यन्ताभाव प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणतादृशहेतुमान् पक्षः इति ज्ञाने व्यापकत्वघटकाभावाधिकरणांशे परम्परया वैशिष्टरूरूपहेतुतावच्छेदकस्यापि भाने तद्वन्निष्ठाभाव

प्रतियोगितानवच्देदकत्वमपि द्रव्यत्वादिरूपसाध्यतावच्छेदके भासते।

एवं विशिष्टहेतुपक्षधर्मताज्ञानेऽपि विशेषणांशेऽपि तद्भानात् नियमेन विशिष्टहेतुव्याप्तिज्ञानस्य विशेषणनिष्ठव्याप्त्यवगाहितया तादृशव्याप्तिविशिष्टवैशिष्ट्यहेतुत। एव अनुमिति विशिष्ट सत्तात्वा द्यवच्छिन्नस्य व्याप्त्यन्तरस्वीकारो निरर्थकः । न च विनिगमनाविरहः । यत्र द्रव्यं- गुणकर्मान्यत्ववैशिष्ट्यात् इत्येन परम्परासम्बन्धेन हेतूक्रियते तत्र वैशिष्ट्यव्याप्तेः अवश्यं स्वीकार्यतया तस्या आवश्यकत्पवादित्यर्थः।

विशिष्टव्याप्तिभाने विशेषणव्याप्तिभानं न सम्भवतीति शङ्कते - न चेति। साध्यसामानाधिकरण्येति । द्रव्यत्वसमानाधिकरणं विशिष्टसत्वं इति ज्ञाने विशिष्टस्य विशेष्य तया भानात् । विशेषणतया भान एव विशेषणतावच्छेदकस्यापि परम्परया भानाभ्युपगमात् । साध्यसामानाधिकरण्यस्य सत्तायां भाने तद्विशेषणवैशिष्ट्येऽभानादिति भावः। अनियमादिति - कदाचित् द्रव्यत्वसमानाधिकरणत्वस्तू विशिष्टसत्तायां ग्रहे वैशिष्ट्ये समानाधिकरणवृत्तित्वस्य तुल्यवित्तिवेद्यतया भाने परम्परया वेशिष्ट्ये द्रव्यत्व सामानाधिकरण्यभानं सम्भवतीत्यभिप्रायेण।

साध्यविरोधेति - द्रव्यं द्रव्यान्यत्वविशिष्टसत्त्वात् इति विरूद्धहेतौ विरोधः। यदि साध्यासामानाधिकरण्यरूपः तदाविशेष्ये साध्यसामानाधिकरण्यसत्त्वेन विशिष्टे तदभावः विशेष्यत्तीति न्यायेन दुर्घटः। अतः स्वावच्छिन्नाधिकरणत्वाभाववत्साध्याधिकरणकत्वं विरोध इति वाच्यम्। एतादृशविरोधज्ञानस्य च यथाश्रुतहेततुसाध्यसामानाधिकरण्यज्ञानं प्रति असमानाकारतया अविरोधित्वेन

उक्तविरोधज्ञानकाले अनुमितिवारणं दुर्घटम्। अतः अन्यथैव वाच्यम् । तत्रापि जनकज्ञानविघटनेनैवेति तदनुरोधेन विशिष्टाधिकरणीभूतविशिष्टहेतुव्यापकसाध्याधिकरणकत्वं व्याप्तिरिति उपेयम्। तथा सति निरूक्तव्याप्त्यवगाहिपरामर्शे उक्तविधसामानाधिकरण्यभाने पूर्वोक्तविरोधग्रहस्य विरोधित्वं च निर्वहति।

एवमनभ्युपगमे उक्तविरोधस्य यथाश्रुतव्याप्तिविषयकजनकज्ञानाविरोधितया हेत्वाभासत्वमेव दुर्घटं स्यात् । तथा च उक्तव्याप्तौ साध्यवति विशिष्टहेत्वधिकरणत्वभाने परम्परया वैशिष्ट्याधिकरणत्वस्यापि नियमेन भानात् विशिष्टहेतुकपरामर्शस्य नियमेन विशेषणांशेऽपि साध्यसामानाधिकरणावगाहित्वात् । विशिष्टपरामर्शस्य विशेषणपरामर्शरूपत्वात् कृप्तकारणताकतादृशपरामर्शविषयविशेषणव्याप्त्यैव निर्वाहे विशिष्टव्याप्तेः

अनावश्यकत्वप्रसङ्गात् द्वितीयमताश्रयणमयुक्तमिति प्रथममतस्यैव आश्रयणीतया तत्र च विशिष्टनिरूपितसमवायस्यैव हेतुतावच्छेदकसम्बन्धतया हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वनिवेशेनैव उपपत्तौ हेतुतावच्छेदकवैशिष्ट्यनिवेशनं विफलमिति भावः।

विशिष्टवैशिष्ट्यागाहिज्ञाने विशिष्टनिरूपितसमवायेन विशेषणीभूतहेतुभानं विशेषणतावच्छेदकतया वैशिष्ट्यभानं विना न सम्भवति। अन्यता विशिष्टवैशिष्ट्यावगाहिताया एव अनुपपत्तेः।

अयमर्थः - विशिष्टसत्तात्वेन विशिष्टसत्ता यत्र ज्ञाने प्रकारतया भासते तत्रैव विशिष्टनिरूपितसमवायः विशेषणसंसर्गः। शुद्धसत्तात्वेन सत्ताप्रकारकज्ञाने च शुद्ध एव समवायः। तथा च व्यापकघटकाभावाधिकरणे विशिष्टनिरूपितसमवायेन विशिष्टहेतोः भाने तादृशाधिकरणे वैशिष्ट्यभानं नास्ति। न तु हेतु हेतुतावच्छेदकोभयावगाहिता गौरवात् ।

इत्थं च हेतुतावच्छेदकीभूतविशिष्टनिरूपितसमवायसम्बन्धलाभः हेतुतावच्छेदकविशिष्टहेतुप्रवेशं विना न सिद्धयति। हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वमात्रोक्तौ शुद्धसमवायसम्बन्धस्यापि हेतुतावच्छेदकत्वसत्त्वात् तमादाया पूर्वोक्त दोष एव स्यादित्यभिप्रायेण समाधत्ते - मैवमिति।

उक्तप्रकारेण प्रथममते समाधानमनेनाभिमतम्। द्वितीयमते समाधानार्थमाह - धर्मिपारतन्त्र्येणैवेति। तथा च विशिष्टव्यापकत्वं विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावघटितम् अत्र च अभावाधिकरणे विशेषणस्य विशेष्यपृष्ठभावेनैव प्रवेशः। न तु साक्षादधिकरणे प्रवेश इत्यर्थः।

अस्तु तावता का हानिरिति चेत् आह - तथा चेति - पारतन्त्र्येणैव निवेश इत्यर्थः । तद्ग्रहे - विशिष्टनिरूपितव्यापकताग्रे। नियम इत्यनेन कदाचित् औचित्यात् विशेषणव्यापकत्वस्य भानं सम्भवतीति सूचितं उपपादयति - विशेषणेत्यादिना। विशेषणव्यापकत्वं विशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावघटितं विशिष्टव्यापकत्वं च विशिष्टव्यापकत्वं च विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वपर्याप्तावच्छेदकताक प्रतियोगिताकाभावघटितम् इत्युभयविधव्यापकत्वयोः पृथक् पृथगभावघटिततया भेदेन विशिष्टव्यापकत्वभाने विशेषणव्यापकत्वस्य अभानादिति भावः।

ननु विशेष्यीभूतसत्तायाः विशिष्टव्यापकत्वशरीरप्रविष्टप्रतियोगिकोटौ प्रवेशेऽपि तस्याः विशेषणीभूतवैशिष्ट्यवदधिकरणांशे उपलक्षणतया प्रवेशोऽस्तु , न तु तदन्तर्भावेन प्रतियोगितावच्छेदकत्वपर्याप्तिः, सा तु वैशिष्ट्यवदित्यादिव्यापकत्वघटकवैशिष्ट्यादिपदार्थेष्वेव।

एवं च एतादृशविशिष्टव्यापकत्वग्रहे विशेषणव्यापकत्वभानं सुघटमेवेति शङ्कां निरस्यति - अभावेति। अनुपगमादिति। अन्यथा घटत्वावच्छिन्नाभावप्रतियोगितावच्छेदककोटौ उपलक्षणतया जातित्वम् अवगाह्य पटादिमति भूतले जातिमान्नास्तीति बुद्ध्यापत्तेरिति भावः।

परम्परासम्बन्धेन यत्र वैशिष्ट्यं हेतुः तत्रविशेषणनिष्ठव्याप्त्यवाहिपरामर्शस्य कारणत्वम् उभाभ्यां स्वीकरणीयम्। विशिष्टहेतुकपरामर्शस्थले तस्य पृथक्कारणत्वे गौरवं भवति। तद्घटकविशेषणव्याप्तिज्ञानादेव अनुमितिनिर्वाहादिति युक्त्याय विशिष्टपरामर्शस्थले स्वातन्त्र्येण विशेषणवत्त्वस्य व्याप्तिशरीरे भानं स्वीकृत्य विशेषणेऽपि व्याप्तिभानं कल्प्यत इति शङ्कते - न चेति। लाघवानुरोधेनेति। अवश्यक्लृप्तकारणताकविशेषणपरामर्शादेव अनुमितिनिर्वाहादिति

भावः। अधिकरणे - व्यापकत्वघटकाभावाधिकरणे । स्वातन्त्र्येण विशेष्यमद्वारीकृत्य। कल्पनीयमिति।

न च परामर्शान्तरस्य कारणत्वं कल्प्यतां आहोस्वित् विशिष्टव्याप्तिग्रहे स्वातन्त्र्येण विशेषणवत्त्वस्य भानं कल्प्यतामित्यत्र विनिगमकाभाव इति वाच्यम् ।

अतिरिक्तकार्यकारणभावकल्पनापेक्षया क्लृप्तज्ञाने विशेषणभानमात्रकल्पने लाघवस्य अक्षतत्वात्।

शब्दाधीनेति - यो यः गुणकर्मान्यत्वे सति सत्तावान् तद्द्रव्यं इत्याकरकवाक्यात् हेतुमान् विशिष्टसत्ताव्यापकद्रव्यत्ववान् इत्याकारकशाब्दबोधात्मकविशिष्टव्याप्तिग्रहस्थले शब्दवृत्त्या विशिष्टाधिकरणत्वगर्भव्यापकत्वभाने एकदेशविशेषणाधिकरणत्वघटितस्य तस्यय वृत्त्यन्तरं विना भानानियमादित्याशयः। यद्वा द्रव्यत्वव्याप्यविशिष्टसत्तावदिदं

इत्याकारकशब्दात्।

तादृशव्याप्तिबोधकशब्दस्येति - विशिष्टवत्त्वगर्भव्याप्तिबोधकशब्दस्येत्यर्थः। विशेषणवत्त्वाभासकत्वात् विशिष्टाधिकरणत्वघटितव्यापकत्वशक्तपदस्य तादृशार्थबोधं प्रत्येव करणतया विशेष्यांशपरित्यागेन विशेषणवत्व स्वातन्त्र्ेण भानप्रयोजकत्वाभावात् । अत एव विशिष्टशक्तपदानां एकदेशपरत्वं लक्षणयैव तत्र तत्रोच्यत इति बोध्यम् ।

प्रतिबन्धा समाधत्ते एवं सतीति। दण्डादीति - दण्डविशिष्टहेतुस्थले विशेषणस्य धर्मिपारतन्त्र्ेण अधिकरणांशे भानेन विशेषणव्याप्तिभानं भवेदिति पूर्वोक्तस्थलतुल्यत्वमेवेत्यतः उपलक्षितेति। उपलक्षणस्य च धर्मिपारतन्त्र्ेण अधिकरणे भानस्य अनभ्युपगमात् । उपलक्षितविशेष्यव्याप्तिभाने उपलक्षणे व्याप्तिभानस्य असम्भवात् । अवश्यमुपलक्षितधर्मिव्याप्तिज्ञानस्यैव तत्स्थलीयानुमितिहेतुत्वमिष्टम् - तन्नोपपद्यते - यतः उपलक्षणं यादृशसम्बन्धेन भासते तद्घटितपरम्परासम्बन्धेन स्वाश्रयदण्डप्रतियोगिकसंयोगादिता साक्षात् उपलक्षणस्यापि धर्मिणि भानमुपगम्य उपलक्षणेऽपि व्याप्तिग्रहस्य कल्पनं सम्भवति। उक्तपरम्परासम्बन्धेन दण्डादिहेतुकानुमित्युरोधेन एतादृशव्याप्तिज्ञानकारणतायाः उभयवादिसम्मतत्वात् धर्मिहेतुकपरामर्शस्य कारणत्वान्तराकल्पनेन लाघवादिति भावः।

उपलक्षितधर्मिहेतुकानुमितिविलये इष्टापत्तौ दूषणान्तरमाह - स्वातन्त्र्ेणेति। विशेषणस्य केनचित्परम्परासम्बन्धेन स्वातन्त्र्ेण परामर्शः कस्यापि न जातः तत्र अनुमित्युपपादनाय विशिष्टपदोपादानं इति सूचनाय प्रथमं सकलपदम् । यादृशाङ्कुरविशेषात्मकस्य विशेषणस्य

केनापि परम्परासम्बन्धेन परामर्शः कदापि कस्यापि न जातः तत्र विशिष्टहेतुपरामर्शस्यैव कारणत्वं निर्बाधमिति सूचनाय द्वितीयं सकलपदं।

अप्रामाणिकतयेति - उक्तरीत्या स्थलविशेषे विशेषणपरामर्शासम्भवस्य दर्शितत्वातृ सर्वत्र तादृशग्रहस्य प्रमाणविरूद्धकत्वादित्यर्थः। क्लृप्तत्वानियमादिति - सर्वत्रैवविशेषणपरामर्शः सम्भवतीति कल्पयितुमशक्यतया विशेषणहेतुक परामर्शकारणतायाः स्थलविशेषे उभयवादिसम्प्रत्तिपन्नत्वाभावेन तस्याः क्लृप्तत्वासम्भवेन विशिष्टपरामर्शस्यैव स्वीकरणीयतया

तन्निर्वाहाय विशिष्टपदोपादानमावश्यकमिति भावः।

प्रतियोग्यसमानाधिकरणेत्यादि यथाश्रुतमूलस्य अग्रे उक्तव्याप्त्यैक्यप्रदर्शनपरेण एकैवहि सा व्याप्तिरित्यनेन विरोधपरिहारार्थं उक्तमूलग्रन्थस्यापि एकव्याप्तिपरत्वं सम्भवतीति प्रतिपादनाय दीधितिकृता व्याप्त्यैक्यं वर्ण्यत इत्याहनन्विति। साध्यसामानाधिकरण्यस्य तदधिकरणवृत्तित्वरूपत्वे तादात्म्येन हेतुसाध्यभावस्थले व्याप्तिः स्यादिति। वन्हिसंयोगिसंयोगेति। भेदहेत्वकथनेन न्यूनतावारणायाह - अधिकरणभेदेनेति। वन्हित्वादिरूपसाध्यतावच्छेदकमिति। प्रकृते सामानाधिकरण्यनिरूपकतावच्छेदकं साध्यतावच्छेदकमित्यभिप्रायेणोक्तम्। न तु निरूपकतावच्छेदकमित्यस्यैव साध्यतावच्छेदकमित्यर्थ इत्यभिप्रायेण। एवमधिकरणावच्छेदकमित्यग्रिमव्याख्यानेऽपि बोध्यम् ।

नन्वेतावतापि सामानाधिकरण्यरूपव्याप्तेरैक्यं नोपपद्यत इति चेत्तद्भावमाचष्टे - तदभेदेति। तथा च एकैवहीति ग्रन्थे एकहेतुतावच्छेदकादिघटिता व्याप्तिरित्यस्मिन्नर्थे गौण एकत्वव्यवहार इति भावः।

वस्तुत इत्यादि ग्रन्थमवतारयति - नन्विति विशिष्टपरामर्शनिवाहार्थमिति। प्रकृतपक्षेप्रकृतसाध्यव्याप्तिविशिष्टहेतुमत्ताज्ञानसम्पत्त्यर्थमित्यर्थः। अयमाशयः - महानसादौ वन्हिधूमयोः भूयः सहचारदर्शनेन धूमे वन्हिव्याप्तिं गृह्णाति अनन्तरं कदाचित् पर्वतसमीपं गत्वा तत्र धूमदर्शनानन्तरं वन्हिव्याप्यो धूम इति व्याप्तिं स्मरति। अथ उपनीततादृशव्याप्तिविशिष्टधूमवान् पर्वत इति परामर्शः तदनु अनुमितिरिति स्वीक्रियते। तत्र पर्वते धूमदर्शनानन्तरं पर्वतीयधूमनिष्ठव्याप्तेरेव स्मरणमिति वक्तव्यम् । अन्यधूमगतव्याप्तिस्मरणेन अन्यत्र व्याप्त्युपनया संभवात् एकसम्बन्धिज्ञानं अपरसम्बन्धिस्माकमिति न्यायेनैव धूमदर्शनस्य व्याप्तिस्मारकतायाः वाच्यतया स्वगतसम्बन्धस्यैवोक्तन्यायेन स्मरणसम्भवाच्च। पक्षीयधूमगतव्याप्तिस्मरणस्य च तदनुभवं विनाऽसम्भवात्। अनुभवश्च पूर्वं महानसादौ महानसीयधूमादिव्याप्तेरेव।

न च तदानीमेष सामान्यलक्षणाप्रत्त्यासत्त्या पक्षीयधूमव्याप्तेरपि ग्रहणं सम्भवतीति वाच्यम्।

तथा सति पक्षीयधूमादिभेदेन व्याप्तेर्भेदेऽपि सामान्यलक्षणया निखिलव्याप्तिग्रहणसम्भवेन व्याप्त्यैक्यकथनस्य अनुपयुक्तत्वात्। अतः सामान्यप्रत्त्यासत्त्यभावपक्ष एव विशिष्टपरामर्शनिर्वाहाय व्याप्त्यैक्यकथनमिति।

तन्निर्वाहस्येति - विशिष्टपरामर्शनिर्वाहस्येत्यर्थः। धूमत्वादेरैक्येऽपि इति - व्याप्तिघटकधूमत्वादेरैक्येऽपि

सामानाधिकरण्यरूपव्याप्तेः प्रतिधूमं भिन्नत्वेन सामान्यप्रत्त्यासत्त्यभावे पक्षीयधूमनिष्ठसामानाधिकरण्यस्य पूर्वं ग्रहासम्भवेन तत्स्मरणासम्भवात् विशिष्टपरामर्शनिर्वाहासम्भव एवेति 'एकैवेति व्यावहारस्तू मुख्यत्वमुपगन्तव्यम् । तथात्वे सर्वसाधारणव्याप्तेः एकत्वावश्यम्भावेन न पूर्वोक्तानुपत्तिरित्याशयः। अत इति - विशिष्टपरामर्शर्वाहायोगादित्यर्थः।

ननु सामान्यप्रत्त्यासत्तिसद्भावाभिप्रायेणैव सामानाधिकरणस्य व्याप्तित्वम् एकैवहीति भाक्तमेकत्वं चोक्तम्।

न च इदानीं एकत्वकथनस्य विशिष्टपरामर्शनिर्वाहाय आवश्यकता नास्ति व्याप्ते र्भेदेऽपि तन्निर्वाहादिति वाच्यम्।

सामान्यप्रत्त्यासत्तिसम्भवप्रदर्शनार्थमेव तदुक्तेः। तथाहि एकहेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकैककसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य एकहेतुतावच्छेदकादिघटिततत्त्वैनेक्यकथनं तु धमूव्यापकवन्हिसामानाधिकरण्यत्वेन सामान्यप्रत्त्यासत्त्या ग्रहणोपपादकं भवति। अन्यथा हि - तद्धूमव्यापकवन्हिसामानाधिकरण्यादिरूपत्वे पक्षीयधूमे सामान्यप्रत्यासत्त्यानिर्वाहात्।

नन्वेतादृशैक्यस्य सिद्धत्वात् न समर्थनीयतेति चेत् प्रसिद्धमेव स्पाष्टयार्थमनूद्यते। हिशब्दः प्रसिद्ध्यर्थक एवेत्युक्तौ दूषणान्तरमाह - अतिप्रसंगेन चेति।

यद्वा साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वात्मकव्याध्यभिप्रायेण एकैव हीति ग्रन्थ इत्युक्तौ दूषणान्तरमाह अतिप्रसंगेन चेति - रासभादिसाधारण्येनेत्यर्थः।

द्विधेति - व्यापकत्वनिरूपकतावच्छेदकतया - सामानाधिकरण्य विशेषणतय चेत्यर्थः। भेदमभेदं चेति- प्रथमपक्षे व्याप्तेः सामानाधिकरण्यरूपतया पूर्वोक्तरीत्या भेदः। द्वितीयपक्षे समानाधिकरणवृत्ति हेतुतावच्छेदकरूपव्याप्तेः अभेद इति बोध्यम् । पक्षद्वयप्रदर्शनस्य प्रयोजनमाह - प्रथमेति - धूमत्वत्वाद्यप्रवेशादिति। धूमत्वस्य व्यापकत्व घटकतया सामानाधिकरण्यविशेषणतया च स्वरूपत एव भानादिति भावः। सामान्यप्रत्त्यासत्तिपक्ष इति । तदसत्त्वपक्षे द्वितीयपक्ष एव आश्रयणीयः। अन्यथा विशिष्ट परामर्शानिर्वाहादिति सूवितम्।

भ्रमंविनापीति - सल्लिंगकपरामर्शस्य भ्रमानुमित्यजनकत्व नियमात्। वन्हिव्याप्यरासभवान् अयं देशः इति परामर्शस्य व्याप्ति पक्षधर्मताविशिष्टलिङ्गावगाहित्वेन सल्लिङ्गकतया निर्वन्हिदेशेऽपि निरूक्तपरामर्शसम्भवात् तत्र वन्ह्यनुमितेश्च भ्रमत्वादिति भावः।

अत्र यथाश्रुतव्याप्तेः रासभादिसामानाधिकरण्येऽपि तादृशव्याप्तिप्रकारकपक्षधर्मताज्ञानस्य अन्यादृशस्यैव कारणत्वमङ्गीकृत्यैव उक्तदोषवारणसम्भवात् वस्तुतस्त्विवत्यादिकल्पवैयर्थ्यमिति शङ्कते - अथेति - यद्यपि वक्ष्यमाणरीत्या उक्तदोषवारणेऽपि रासभो वन्हिव्याप्य इति व्यवहारापत्तिस्सम्भवत्येव यथाश्रुतकल्पे, तथापि

समभिव्याहृतपदार्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नव्यापकतायाः तादृशव्यवहारे भानोपगमे रासभव्यापकत्वस्रू वन्हौ बाधितत्वेन न दोष इति बोध्यम्।

व्यापकत्वप्रविष्टेति - व्यापकत्वप्रविष्टहेतुतावच्छेदकं धर्मितावच्छेदकं यस्य तादृशसामानाधिकरण्यप्रकारकज्ञानस्येत्यर्थः। धूमव्यापकवन्हिसमानाधिकरणरास भवानिति ज्ञानस्रू अतादृशत्वेन नातिप्रसंग इत्यर्थः।

ननु धूमव्यापकवन्हिसमानाधिकरणधूमत्वेनैव यत्र परामर्शे रासभो भासते,

तादृशपरामर्शमादाय पुनरपि अतिप्रसंग इति चेदाह - धूमत्वेति। - तथा च नोक्तनियमभङ्ग इत्यर्थः।

नन्वेतादृशव्याप्तिज्ञानस्य कारणत्वमतिरिक्ततया अवता कल्पनीयमिति गौरवमिति चेदाह - वक्ष्यमाणेति। तत्कल्परीत्या धूमनिष्ठतादृशसामानाधिकरण्यवद्वान् पक्ष इति ज्ञानस्यैव कारणत्वं लभ्येत, तच्चाकिञ्चित्करमिति तादृशज्ञानस्यैव तत्कल्पेऽपि कारणत्वं वाच्यमिति न मन्मतेऽतिरिक्तकल्पनमिति यभावः।

ननु धूमनिष्ठसामानाधिकरण्यस्रू व्याप्तित्वे व्याप्तिविशिष्टप्रकृतहेतुमत्ताज्ञानकारणत्वस्य सर्वसम्मतत्वान्नाधिककल्पनम्। भवन्मते च केवलसामानाधिकरण्यस्य व्याप्तित्वात् तत्प्रकारेण रासभरूपहेतुमत्ताज्ञानव्यावृत्त्यै तादृशज्ञानस्य कारणत्वं कल्पनीयमिति कथमेतदिति चेत् व्याप्तिविशिष्टप्रकृतहेतुमत्ताज्ञानस्य हेतुतायाः सर्वसम्मतत्वेऽपि प्रथमकल्पे सामानाधिकरण्यविशेषणतया प्रकृतहेतुतावच्छेदकविशिष्टहेतुनिष्ठत्व भानेन पुनरपि हेतुतावच्छेदकस्य सामानाधिकरण्यर्धिमतावच्छेदकतया भाने प्रयोजनविरहात् गौरवाच्येति युकत्या सामानाधिकरण्यवद्वान् पक्ष इति ज्ञानस्यैव स्वरसतः कारणत्वं स्यात्, तच्चाकिञ्चित्करमिति ईदृशज्ञानस्य कारणत्वमेष्टव्यमित्याशयात्।

बाधकमाह - अन्यथेति। उपलक्षितेति - सामानाधिकरण्यविशिष्टवत्ताज्ञानस्य गुणे भ्रमरूपत्वादिदम्।

ननु व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानमेव सर्वत्र अनुमितिहेतुः न तु तदुपलक्षितवैशिष्ट्यज्ञानमिति कथमियमापत्तिरिति चेत् तत्राह - साध्येति दुर्निश्चेयतयेति। तथा च पक्षे साध्यसन्देहदशायामेव प्रायशोऽनुमितेर्दर्शनात्। तन्निर्वाहार्थं उपलक्षितवत्ताज्ञानस्य कारणत्वमावश्यकमिति द्रव्यंविशिष्टसत्त्वादित्यत्र तादृशसामानाधिकरण्योपलक्षितसत्तावान् गुण इति ज्ञानात् गुणे द्रव्यत्वानुमानापत्तिरिति भावः।

गुणो न द्रव्यमिति बाधग्रहाभावे उक्तानुमताविष्टापत्तिसंभवात्, सल्लिंगकेत्यादिनियमस्य च सङ्कोचेन बाधाग्रहस्थले

प्रवृत्त्यनभ्युपगमात् इति हेतुतावच्छेदक धर्मितावच्छेदककज्ञानस्य हेतुत्वं नोपेयमित्यत्राह - केवलेति। असिद्धिग्रहदशायां अनुमित्यभावः सर्वसम्मतः। स च कारणज्ञानविघटनेनैव वाच्यः। तच्चज्ञानं धूमव्यापकवन्हिनिरूपित धूमनिष्ठसामानाधिकरण्यवद्वान् पक्ष इत्याकारकम्। तत्र च धूमव्यापकत्वांशभाने धूमाभाववान् पक्ष इति ज्ञानस्यू विरोधिविषयकत्वाभावेन न प्रतिबन्धकत्वम् । परिशेषात् तादृशसामानाधिकरण्यवद्वान् पक्ष इत्यत्रौव प्रतिबन्धकत्वं वक्तव्यम्, तदपि न सम्भवति। समानप्रकारकत्वाभावात् उभयज्ञानयोः।

तद्धर्मावच्छिन्नाभावज्ञानस्यय तद्धर्मावच्छिन्नतत्प्रकारबुद्धिं प्रत्येव प्रतिबन्धकत्वात् उक्तस्थले सामानाधिकरण्यवत्त्वेनैव धूमभानादिति भावः। उक्तरीत्या कारणीभूतज्ञाननिष्कर्षस्य सिद्धान्तत्वात् तदंशे पूर्वपक्षत्वं नास्तीत्याह - सत्यमिति।

वस्तुतस्त्वित्यादिकल्पाभिप्रेतार्थविवरणेन तद्वैयर्थ्यशङ्कामपनुदति - धूमत्वादिमतीति। अत्र सप्तम्या नाधेयत्वमर्थः। किन्तु अध्याहृतविशेषणतापन्न पदार्थविशेषणतान्वितं निरूपितत्वम्।

तथा च धूमत्वादिमद्विशेषणतापन्नं सामानाधिकरण्यमित्यर्थे अर्थात् धूमत्वादिरूपहेतुतावच्छेकसामानाधिकरण्ययोः परस्परं धर्मितावच्छेदकप्रकारताभावविवक्षया एक धर्मिविशेषणतापन्न धूमत्वादिरूपहेतुतावच्छेदकसामानाधिकरण्योभयं व्याप्तिरिति लभ्यते इति भावः।कारणं चेति। धूमेति। न तु एकत्र द्वयमिति रीत्या तादृशसामानाधिकरण्यधूमत्वोभयावगाहिपरामर्शः। तथात्वे विरोधस्य हेत्वाभासत्वानुपपत्तिः। एवमपि उक्तोभयस्य यअनुमितिजनकज्ञानीयपक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितविषयताश्रयत्वरूपं व्याप्तित्वं निर्वहति - उक्तपरामर्शे उभयोरेव धूमांशे प्रकारत्वादित्यभिप्रायः।

तद्वति धूमत्वादिकं व्याप्तिरिति पक्षे यथाश्रुतग्रन्थरीत्या धूमव्यापकवन्हिसमानाधिकरणवृत्तिधूमत्ववद्वान् पर्वत इति ज्ञानस्य हेतुत्वं प्रतीयते तन्नयुक्तमित्याह - द्वितीयपक्षेचेति। तथा सति तादृशज्ञानस्य धूमत्ववद्वान् पक्ष इति ज्ञानस्य स्वरूपतो धूमत्वाप्रकारकस्य स्वरूपतो धूमत्वावगाहि धूमाभाववान् पक्ष इत्याकारकस्वरूपासिद्धिज्ञानप्रतिबन्धयत्वं न सम्भवति। प्रतियोग्यंशे समानप्रकारकज्ञानस्यैव बाध्यबाधकभावात्।

उक्तकल्पे हेतौ साध्यासामानाधिकरण्यस्यू विरोधत्वे तज्ज्ञानस्य हेतुतावच्छेदके साध्यसमानाधिकरणवृत्तित्वावगाहिसामानाधिकरण्यांशे निर्धर्मितावच्छेदककज्ञानं प्रति, बन्धकत्वानुपपत्त्या विरोधमन्यथा निर्वक्ति - एतन्मत इति। हेतुतावच्छेदक इति। धूमत्वत्वाद्यवच्छिन्ने साध्यसमानाधिकरणावृत्तित्वं विरोधः। एतज्ज्ञानस्य च समानाधिकरणवृत्तिधूमत्वमिति व्याप्तिज्ञानं प्रति प्रतिबन्धकत्वमक्षतमित्यर्थः। उपदर्शितज्ञानस्य समानाधिकरणवृत्तिधूमत्ववद्धूमवानिति ज्ञानस्य धूमत्वांशे सामानाधिकरण्यधर्मितावच्छेदकत्वानवगाहितया समानधर्मिता वच्छेदककज्ञानयोरेव प्रतिबध्यप्रतिबन्धक भावेन विरोधज्ञान प्रतिबध्यत्वाभावादित्यर्थः।

प्रसिद्धस्वरूपस्यैव विरोधत्वमवलम्ब्याह - यदीति। साक्षाद्विरोधितयेति - हेतौ साध्याभावव्याप्यत्वस्यैव विरोधितया तज्ज्ञानस्य च 'विरोधोऽपि फलतः प्रतिरोध एव' इति ग्रन्थव्याख्यानरीत्या हेत्वाभासत्वमुपपद्यते। तथाहि हेतोः साध्यवदवृत्तित्वं विरोधः तज्ज्ञानस्य च हेतुमान् पक्ष इति ज्ञानसहितस्य साध्यासमानाधिकरणधर्मवत्ताज्ञानस्येव प्रतिबन्धकत्वं,

तादृशज्ञानस्य ज्ञानद्वयसाधारण्यानुरोधेन पक्षधर्मिकहेतुमत्ताज्ञानविशिष्टहेतुर्धर्मिकसाध्यासामानाधिकरण्यज्ञानत्वेन साध्यवत्त्वज्ञानप्रतिबन्धकत्वकल्पनात्।

हेत्वाभासलक्षणं च यादृशविशिष्टविषयित्वव्यापकः प्रकृतानुमित्यप्रतिबन्धकत्वपक्षधर्मिक- हेतुमत्ताज्ञानकालीनत्वोभयाभावः तादृशत्वमिति। उक्तविरोधस्य साध्याभावव्याप्यत्वरूपत्वमपि सम्भवति। साध्याभावीयव्याप्तिः पूर्वपक्षीया साध्यवदवृत्तित्वमेवेति।

ननु तद्वत्ताबुद्धिं प्रति तदसमानाधिकरणधर्मवत्ताज्ञानस्य स्वातन्त्र्ेणैव तदभावव्याप्यवत्ताज्ञानस्येव विरोधित्वं ग्रन्थान्तरे उक्तम्। तच्च विशिष्टज्ञानत्वेनैव न तु ज्ञानविशिष्टत्वेन तथा च कथमेतदिति चेत् - उच्यते - तदसमानाधिकरणधर्मत्वेन तद्वत्ताज्ञानस्य एकधैव प्रतिबन्धकत्वम्। साध्याभावव्याप्यत्वेन तद्वक्ताज्ञानस्य ज्ञानविशिष्टज्ञानत्वेनेति विशेषात्।

अस्मिन् पक्षे व्याप्तिज्ञानमाह - तदिति। निर्धर्मितावच्छेदककमिति। धूमत्वादिकं धर्मितावच्छेदकतयानवगाहमानमित्यर्थः। अस्य हेतुत्वानुपगमे बाधकमाह - अन्ययेति। धूमत्वत्वेति - धूमेतरावृत्तिसहितनिखिलधूमवृत्तित्वविषयतायाः कारणतावच्छेदककृक्षौ प्रवेशे गौरवात्। पूर्वं तु विरोधज्ञान प्रतिबन्धकत्वानुरोधेन तादृशगौरवं सह्यम्। अत्र च निष्प्रयोजनतादृशगौरवासहिष्णुतायाः अन्याय्यत्वादिति भावः।

नन्वेवमितोऽपि लाघवात् सामानाधिकरण्यप्रकारेणैव धूमावगाहिज्ञानस्य हेतुत्वमस्तु ंइति शङ्कते - सामानाधिकरण्येति। समाधत्ते - सामान्येति। सामान्यप्रत्त्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थमेव - समानाधिकरणवृत्तिहेतुतावच्छेदकपर्यन्तस्यू व्याप्तित्वोपगमात्। अत्र च तादृशसमानाधिकरणवृत्तिप्रकारकत्वेन गृरूरूपेण हेतुताया आवश्यकत्वात्।

द्वितीयकल्पेऽपि क्वचित् व्याप्तिभेद एवेति जगदीशोक्तं दूषणं परिहरति - अनुगतेति। दण्डिसंयोगवान् दण्डिन इत्यत्र यथाथुते दण्डस्यैव हेतुतावच्छेदकतया तस्य च भिन्नभिन्नतया सर्वहेतुसाधारण्याभावेऽपि स्वाश्रयाश्रयत्वसम्बन्धेन दण्डत्वस्यैवात्र हेतुतावच्छेदकत्वोपगमेन न व्याप्तिभेद इति दीधितिकारणामाशय इत्यर्थः।

ननु एकैव सा व्याप्तिरिति मणिग्रन्थसङ्गमनायैव खलु एतावान् प्रयासः। तच्च साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वरूपव्याप्त्यन्तराभिप्रायेणाप्युपपद्यत इत्याशङ्कते - यद्यपीति - समाधत्ते - तथापीति। दीधितिकृद्भिरत्र व्याप्तौ ेसामानाधिकरण्यावच्छेदकेत्यत्र स्वरूपसम्बन्धरूपावच्छेदकत्वस्य धूमवान् वन्हेरित्यादौ वन्हित्वेऽपि गतत्वात् तन्न निवेशनीयम्। किन्तु पारिभाषिकावच्छेदकत्वमेव । तच्च स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणत्वरूपम्। तथा सति धूमवान् वन्हेरित्यत्र स्वपदार्थवन्हित्वविशिष्टाधिकरणावृत्तित्वं यावत्साध्यासमानाधिकरणे न सम्भवति। धूमासमानाधिकरणायोगोलकीयवन्हौ वन्हिसामानाधिकरण्यसत्त्वात्। एवं चात्र यावत्पदार्थपर्यालोचने - साध्यासामानाधिकरण्यव्यापकस्वविशिष्टाधिकरणावृत्तित्वकत्वमिति

पर्यवसानात् ईदृशी व्याप्तिः उक्तव्याप्त्यपेक्षया गुरूशरीरा। तज्ज्ञानं च नानुमितिहेतुः, किन्तु लघुभूतोक्तव्याप्तिज्ञानमेवेत्यत्रैव कथञ्चित् समर्थनीयम्। तथा च सति, तादृशव्याप्तिज्ञानस्य अनुमितिहेतुत्वं नास्तीति उक्तव्याप्तेरेव ऐक्यमुपपाद्यते ग्रन्थकारैरिति भावः।

अयं कपिसंयोगीतीति - अत्र प्रतियोग्यसमानाधिकरण्यविशेषणादाने एतद्वृक्षत्वाधिकरणे एतद्वृक्ष एव मूलावच्छेदेन कपिसंयोगरूपसाध्याभावसत्त्वात्, तत्प्रतियोगितावच्छेदकमेव कपिसंयोगत्वरूपसाध्यतावच्छेदकमित्यव्याप्तिः स्यात्। तादृशविशेषणदानं च कपिसंयोगाभावस्य

स्वप्रतियोगितासमानाधिकरणतया नाव्याप्तिरित्यर्थः। अत्र अव्याप्यवृत्ति कपिसंयोगादिसाध्यकव्याप्यवृत्तिहेतोः सद्धेत्वमेव नोपेयं इतिव्यावृत्तिप्रदर्शनमसंगतमिति शङ्कते - अथेति। मूलादेरिति। मूले - वृक्षः - कपिसंयोगी - एतद्वृक्षत्वात् इति मूलावच्छेदेनापि एतद्वृक्षादौ कपिसंयोगादेः सिद्धिः स्यात्। अत्र व्याप्तिस्वीकारे तादृशपरामर्शस्य सल्लिंगकतया तादृशपरामर्शस्य मूलावच्छेदेन वृक्षे कपिसंयोगविषयकभ्रमानुमिति जनकत्वं स्यात् - तच्चायुक्तम् उक्तपरामर्शस्य भ्रमानुमित्यजनकत्वमिति नियमादिति निरूक्तस्थले व्याप्तिरेव नेष्टव्येति तदर्थं प्रतियोग्यसामानाधिकरण्योपपादनमिति कथसंगतमित्याशयः।

उक्तस्थले व्याप्तिसद्भावेऽपि प्रकारान्तरेणैव अतिप्रसङ्गवारणं शङ्कते नचेति। तदवच्छेदेनेति - मूलावच्छेदेन वृक्षे कपिसंयोगे साध्ये मूलावच्छेदेन साध्यव्याप्यहेतुमत्ताज्ञानमेव हेतुरिति स्वीक्रियते। प्रकृते च एतद्वृक्षत्वरूपहेतोः व्याप्यवृत्तित्वेन किञ्चिदनवच्छिन्नतया मूलावच्छेदेन हेतुमत्ताज्ञानस्य अन्यथैव भ्रमत्वोपपत्त्या न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वमित्यर्थः। अनुमितिः द्विविधा। पक्षतावच्छेदक साध्ययोः स्वरूपसम्बन्धरूपावच्छेद्यावच्छेदकभावावगाहिनी अनतिरिक्तवृत्तित्वरूपावच्छेद्यावच्छेदकभावावगाहिनी चेति। तत्र नुमितौ भागासिद्धेः दोषत्वनिवाहार्थः

तादृशावच्छेदकत्वावगाहि परामर्श एव हेतुरूपेयः। स्वरूपसम्बन्धरूपावच्छेदकत्वावगाह्यनुमितौ च तदवच्छेदेन हेतुमत्ताज्ञानहेतुतायां न युक्त्यन्तरं स्फूरति। अथापि स्वीक्रियते चेत् - तदा एतद्वृक्षत्वहेतुकस्थलेऽतिप्रसंगाभावेऽपि मूलावच्छिन्नपिपीलिकासंयोगस्यापि कपिसंयोगादिनिरूपितयोगिवैयधिकरण्यघटितनिरूक्तव्याप्तिमत्त्वेन तादृशहेतुमत्ताज्ञानादेव मूलावच्छेदेन कपिसंयोगानुमितिः स्यादित्यर्थः। कपिसंयोगादिव्याप्तिः क्वापि न स्वीकरणीयेति उक्तव्यावृत्तिरसंगतैवेति भावः।

अस्मिन् पूर्वपक्षे समाधानमाह - अत्रेहि। एषामयमाशयः - सर्वत्र अनुमितौ पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रमेव भासते, न तु तदवच्छिन्नत्वमपि , कुत इति चेत् हेतोः पक्षधर्मताबलात् साध्यस्य पक्षवृत्तित्वं अवश्यम्भावि। व्यापकस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्तस्यू पक्षधर्मत्वं नोपपद्यते। पक्षे यदि व्यापकं न स्यात् तर्हि व्याप्यमपि न स्यादिति विपर्यय बाधकतर्कसत्वात्। एवं साध्यस्य स्वरूपसम्बन्धरूपपक्षतावच्छेदकावच्छेद्यत्वं विना हेतोः तादृशावच्छेद्यत्वं

अनुपपन्नमित्यनुपपत्तिज्ञानं न सम्भवति।

द्रव्यं संयोगादित्यत्र हेतोः शारवाद्यवच्छिन्नत्वेऽपि साध्यस्यानवच्छिन्नत्वात् । एवं च एतादृशस्थले अवच्छेद्यावच्छेदकभावावगाह्यनुमितेरेव अप्रामाणिकतया तां प्रति पृथक् परामर्शस्य हेतुत्वकल्पनमेव नास्तीति। कपिसंयोग्येतद्वृक्ष